Shree Vijaya Dharm Laxmi Gyana Mandir
आगरा
Belangunj AGRA.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगणेशायनमः॥ ॥ अथद्वादशमासगणेशव्रतकथालिख्यते ॥ ॥
ऋषयऊचुः॥ ॥ दारिद्र्यशोककुष्ठाद्यैःपीडितैश्चैववैरिभिः॥राज्यभ्रष्टनृपैःस
र्वैःक्रियतांक्लेशभाग्जनैः॥ १ ॥ धनहीनैर्जनैःस्कंदसर्वोपद्रवपीडितैः॥ विद्यापुत्र
गृहभ्रष्टैरोगयुक्तैःशिवार्थिभिः॥ २ ॥ किंकर्तव्यंवदोपायंपुनःक्षेमप्रसिद्धये॥ ॥
स्कंदउवाच॥ ॥श्रृणुध्वंमुनयःसर्वेयत्पृष्टोहंव्रतंशुभम् ॥ ३ ॥ येनव्रतेनसंकष्टा
न्तरंतिभुविमानवाः॥व्रतराजंमहापुण्यंनराणांसिद्धिदायकम् ॥ ४ ॥ नारीणांच
विशेषेणपुत्रसौभाग्यवर्धनम्॥ यत्कृतंपांडुपुत्रेणधर्मराजेनधीमता ॥ ५ ॥ रा
ज्यभ्रष्टेनचारण्येभ्रातृभिश्चनरोत्तमैः॥ अरण्येवर्तमानस्यकृष्णेनकथितंपुरा
॥ आत्मकष्टविनाशायतच्छृणुध्वंद्विजोत्तमाः॥ ६ ॥ ॥ युधिष्ठिरउवाच॥ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





केनोपायेनदेवेशसकष्टादुद्धराम्यहम्॥ मुक्तोभवेयंतद्ब्रूहिसर्वज्ञोसिगदाधर॥
॥७॥ ॥स्कंदउवाच॥ ॥कृतप्रश्नोहृषीकेशःप्रोवाचेदंयुधिष्ठिरम्॥ प्रय
तंप्रांजलिंधीरंप्रार्थयंतंमुहुर्मुहुः॥८॥ ॥श्रीकृष्णउवाच॥ ॥अस्तिगु
ह्यतमंराजन्व्रतंसर्वार्थदायकम्॥ यन्मयाकथितंपूर्वंनकस्यापिनरोत्तम॥९
॥पुराकृतयुगेराजन्हिमाचलसुताशुभा॥ तपस्तेपेवनेभूरिनदृष्टःशंकरःपतिः
॥१०॥तदासस्मारहेरंबंगणेशं हिमजातुसा॥तत्क्षणादागतंदृष्ट्वागणेशंपरिपृ
च्छति॥११॥तपस्तसंमहाघोरंदुर्लभंरोमहर्षणम्॥नप्राप्तःपार्वतीकांतोगिरि
शोममवल्लभः॥१२॥संकष्टनाशनंदिव्यंव्रतंनारदउक्तवान्॥त्वदीयंतद्व्रतंतत्त्वं
कथयस्वपुरातनम्॥१३॥तच्छ्रुत्वापार्वतीवाक्यंसंकष्टतारकंशुभम्॥प्रीत्या



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कथितवान्देवोगणेशःक्षिप्रसिद्धिदः ॥ १४ ॥ ॥ श्रीगणेशउवाच ॥ ॥ व्रत
मारभमेपुण्यंसंकष्टव्रतराजकम् ॥ तेनतेभवितासिद्धिरन्यस्यापिभविष्यति ॥
॥ १५ ॥ श्रावणेकृष्णपक्षेतुचतुर्थ्यांचविधूदये ॥ तस्मिन्दिनेव्रतंग्राह्यंसंकष्टाख्यं
सुरेश्वरि ॥ १६ ॥ प्रातःशुचिर्भवेत्सम्यग्दंतधावनपूर्वकम् ॥ निराहारोस्मिन्दिवसे
यावच्चंद्रोदयोभवेत् ॥ १७ ॥ भोक्ष्यामिभोजयित्वातुगणेशंशंकरप्रियम् ॥ एवं
संकल्प्यचादौतुस्नानंशुक्लतिलैर्जलैः ॥ १८ ॥ आह्निकंतुविधायैवंपूजांमेकुरु
सुव्रते ॥ यथाशक्त्यातुसौवर्णीप्रतिमासंविधीयते ॥ १९ ॥ सौवर्णेराजतेताम्रेमृ
न्मयेवाऽथशक्तितः ॥ कुंभेपूर्णजलेपूर्वंदेवंतत्रैवनिक्षिपेत् ॥ २० ॥ शोभितेसं
न्यसेत्कुंभेपात्रेवस्त्रसमन्विते ॥ पद्ममष्टदलंकृत्वापाद्यार्घ्यैरथपूजयेत् ॥ २१ ॥

For Private and Personal Use Only

ग.व्र २ कथा. श्रा.

षोडशैरुपचारैश्चभक्तिभावसमन्वितैः ॥ लंबोदरंचतुर्बाहुंत्रिनेत्रंरक्तवर्णकम् ॥
२२॥नीलवर्णंतुशोभाढ्यंप्रसन्नास्यंविचिंतयेत् ॥ आवाहनंगजास्यायविघ्नराजा
यचासनम् ॥२३॥ पाद्यंलंबोदरायेतिचार्घ्यंशंकरसूनवे ॥ उमापुत्रायचस्नानंवक्र
तुंडायचार्चनम् ॥२४॥ शूर्पकर्णायवस्त्रंचकुब्जायेत्युपवीतकम् ॥ गंधंगणेश्व
रायेतिपुष्पंविघ्नविनाशिने ॥२५॥ विकटायेतिवैधूपंवामनायेतिदीपकम् ॥ नै
वेद्यंसर्वदेवायफलंसर्वार्तिनाशिने ॥२६॥ विघ्नहर्त्रेचतांबूलंधूम्रायेतिप्रद
क्षिणाम् ॥ देवेशायनमस्कारंनमस्कृत्वाक्षमापयेत् ॥२७॥ एवंपूजाप्रकर्त-
व्याषोडशैरुपचारकैः ॥ नानाभक्ष्यादिकैर्युक्तमुपहारंप्रकल्पयेत् ॥ २८॥ मो २
दकान्कारयेद्देविसघृतान्दशपंचकान् ॥ देवाग्रेस्थापयेत्पंचपंचविप्रायदापये

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त् ॥२९॥ दक्षिणांतुयथाशक्त्यादत्वापंचतुमोदकान् ॥ भक्षयेन्निशिचंद्रा
यअर्घ्यंदत्वाचभक्तितः ॥३०॥ ॥अथतिथ्यर्घ्यम् ॥ ॥ तिथीनामुत्तमे
देविगणेशप्रियवल्लभे ॥ गृहाणत्वंमयादत्तंचतुर्थ्यर्घ्यंनमोस्तुते ॥३१॥ ॥
अथचंद्रार्घ्यम्॥ ॥क्षीरसागरसंभूतलक्ष्मीबंधोनिशाकर ॥गृहाणार्घ्यं
मयादत्तंरोहिण्यासहितःशशिन् ॥ ३२॥ लंबोदरनमस्तेस्तुसर्वकामफलप्रद
॥ वांछितंदेहिमेत्वंचसर्वविघ्नविनाशकृत् ॥ ३३॥ ॥ विप्रप्रार्थना ॥ ॥वि
प्रवर्यनमस्तुभ्यंसाक्षाद्देवस्वरूपक ॥ गणेशप्रीतयेतुभ्यंमोदकान्वैददाम्यह
म् ॥ ३४॥ मोदकान्सकलान्पंचदक्षिणाभिःसमन्वितान् ॥ आवयोस्तारणा
यैवगृहाणेमान्नमोस्तुते ॥३५॥ ब्राह्मणान्भोजयेत्पश्चाद्गणेशंप्रार्थयेत्तदा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ आसक्तोबंधुभिश्चान्नंभुंजीतदधिसंयुतम् ॥ ३६॥ प्रतिमांगुरवेदद्याद्देवं
चैवविसर्जयेत् ॥ ३७॥ ॥ विसर्जनमंत्रः ॥ ॥ गच्छगच्छसुरश्रेष्ठस्व
स्थानंतुगणेश्वर ॥ व्रतेनानेनमेनित्यंयथोक्तफलदोभव ॥ ३८॥ एवंव्रतंप्रकर्त
व्यंप्रतिमासंशुभानने ॥ यावज्जीवंतुवाऽब्दानित्वेकविंशतिसंख्यया ॥ ३९॥
अशक्तेवर्षमेकंन्वप्रतिवर्षमथापिवा ॥ उद्यापनंप्रकर्तव्यंचतुर्थ्यांश्रावणेसिते ॥
४०॥ गाणपत्यस्तथाकार्यःसर्वशास्त्रविशारदः ॥ आचार्यंवरयित्वादौप्रोक्तेनवि
धिनार्चयेत् ॥ ४१॥ अष्टोत्तरसहस्त्रंवाशतंवाऽष्टाधिकंतथा ॥ अष्टाविंशतिमष्टौ
वामोदकांश्चप्रहोमयेत् ॥ ४२॥ उच्चमंडपिकाकार्यागीतवादित्रनिःस्वनैः ॥ पूजये
द्भक्तिभावेनगुरुंचैवप्रपूजयेत् ॥ ४३॥ सपत्नीकंसुवर्णाद्यैर्गोभिर्वस्त्रादिभूषणैः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ छत्रंचोपानहौदद्यात्कमंडलुगृहादिभिः ॥४४॥ आचार्यपूजयेद्देविगणेश-
स्यचतुष्टये॥ एवंकृत्वाविधानेनप्रसन्नोहंनसंशयः ॥४५॥ ददामिवांछितंतेभ्यो
यैर्भक्त्यामद्व्रतंकृतम्॥ ॥श्रीकृष्णउवाच॥ ॥एवंतुकथितंपूर्वंगणे
शेनस्वयंनृप ॥ पार्वत्याऽराधितोतेनकृतेनैवसुनिश्चितम् ॥४६॥ व्रतेनानेन
सासाध्वीमहादेवंसमग्रहीत् ॥क्रीडतेतेनसाऽद्यापिगणेशस्यप्रसादतः ॥४७॥
तत्कुरुष्वमहाराजव्रतंसंकष्टनाशनम् ॥ चतुर्थीसंकटानामव्रतमेतन्महाशुभ
म्॥४८॥ ॥स्कंदउवाच॥ ॥एवंकृष्णमुखाच्छ्रुत्वाव्रतंसंकष्टनाशन
म्॥कृतंधर्मेणविप्रेंद्राराज्यकामेनवैपुरा॥४९॥ तेचशत्रून्निहत्यैवस्वराज्यं
प्रतिपेदिरे॥तस्मात्सर्वप्रयत्नेनव्रतंकार्यंविचक्षणैः॥५०॥ येनधर्मार्थकामा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





श्चमोक्षश्चैवभवेदिह ॥ वांछितंतस्यकार्यंतुनृपाणांवशमानयेत् ॥ ५१ ॥ यदा
यदापदंप्राप्तोनरोमुच्येतसंकटात् ॥ नदातदाप्रकर्तव्यंव्रतंसर्वार्थसाधनम् ॥ ५२
॥ सीतान्वेषणकालेतुकृतंवायुसुतेनच ॥ रावणेनकृतंपूर्वंबलिबंधनसंकटे
॥ ५३ ॥ भर्तारमपिशापेनअहल्यायोषितांवरा ॥ विद्यार्थीलभतेविद्यांधनार्थील
भतेधनम् ॥ ५४ ॥ पुत्रार्थीलभतेपुत्रान्रोगीरोगात्प्रमुच्यते ॥ सर्वपापंक्षयंया
तिगणनाथप्रसादतः ॥ ५५ ॥ इतिश्रीस्कंदपुराणेश्रीकृष्णयुधिष्ठिरसंवादेश्रावणकृष्णचतुर्थीव्रतक
थासंपूर्णा ॥ १ ॥ ॥ ॥पार्वत्युवाच॥ ॥ पुत्रभाद्रपदेमासियथासंकष्टनाश
नं ॥ व्रतंभवतितत्सर्वंविस्तरेणवदस्वमाम् ॥ १ ॥ ॥श्रीगणेशउवाच॥ ॥
भद्रेभाद्रपदेमासिसंकष्टायाचतुर्थिका ॥ अनेकफलदाप्रोक्तासर्वसिद्धिप्रदा



For Private and Personal Use Only

यिनी ॥ २॥ पूजापूर्वविधानेनतस्यकार्यासमंततः ॥ विशेषंतुप्रवक्ष्यामिभोज
नादिषुपार्वति ॥ ३॥ ॥श्रीकृष्णाउवाच॥ ॥ एवंनिगदितेपुत्रंपुनःपप्रच्छपा
र्वती ॥ कोविशेषःप्रकर्तव्यःपूजनेभोजनेषुतत् ॥ ४॥ ॥श्रीगणेशउवाच
॥ ॥ गुरूपदिष्टमार्गेणभक्त्यातद्व्रतमाचरेत् ॥ द्वादशेष्वपिमासेषुपृथङ्नाम
भिरर्चयेत् ॥ ५॥ विनायकश्चैकदंतःकृष्णापिंगोगजाननः ॥ लंबोदरोभालचं-
द्रोहेरंबोविकटस्तथा ॥ ६॥ वक्रतुंडश्चाखुरथोविघ्नराजोगणाधिपः॥ द्वादशै
र्नामभिश्चैतैर्गणेशंपूजयेद्व्रती ॥ ७॥ द्वादशेष्वपिमासेषुपूज्यतेनामभिः पृथ
क्॥ चतुर्थ्यांप्रातरुत्थायानित्यकृत्यंयथोदितम् ॥ ८॥ नलोत्यासीत्कृतयुगेपु-
ण्यश्लोकोनराधिपः॥तस्यरूपवतीभार्यादमयंतीतिविश्रुता॥९॥ तस्यदैववशाच्छ्रा

पः स्त्रीवियोगविषादकृत् ॥ तदादेव्या कृतं त्वेतद्व्रतानामुत्तमंव्रतम् ॥ १० ॥ ॥
पार्वत्युवाच ॥ ॥ केनैवविधिना पुत्रदमयंतीव्रतोत्तमम् ॥ चकारभूपतिंले
भेतृतीयेमासिशोभना ॥ ११ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ एवंनिगदितःपा
र्थपार्वत्यागणनायकः ॥ प्रोवाचवचनंधीमान्विस्तरेणशृणुष्वतत् ॥ १२ ॥ ॥
श्रीगणेशउवाच ॥ ॥ मातर्नलस्यभूपस्यविपत्तिर्बहुलाभवत् ॥ गजाश्वगज
शालायांमंदुरायांहयाहृताः ॥ १३ ॥ कोशस्तुतस्करैर्नीतोगृहंदग्धंकृशानुना ॥
मंत्रिणोपिगतास्तस्यराजकार्यविनाशकाः ॥ १४ ॥ अक्षक्रीडनकेनैवराजासर्व
हृतोभवत् ॥ भग्नदेशस्ततोराजासपुरान्निर्गतोवनम् ॥ १५ ॥ दमयंत्यासमंतत्रना
नाक्लेशैश्चपीडितः ॥ तथापिदमयंत्याचवियोगंप्रापदैवतः ॥ १६ ॥ कस्मिंश्चिन्न

गरेराजा भृत्यभावंसमागतः ॥ कस्मिंश्चिद्विषयेभार्याकस्मिंश्चिद्विषयेसुतः
॥१७॥ भिक्षाशिनस्तुतेसर्वेनानाव्याधिप्रपीडिताः ॥ स्वकर्मभोगान्भुंजानाः
परस्परवियोगिनः ॥१८॥ एकदादमयंतीसाशरभंगंमहामुनिम् ॥ प्रणम्यपाद
योर्मूर्ध्नाबद्धांजलिरभाषत ॥१९॥ ॥दमयंत्युवाच॥ ॥ कथंमेमत्पतिप्रा
प्तिः पुत्रप्राप्तिः कथंभवेत् ॥ कथंगजहयान्राज्यंनगरंनरसंकुलम् ॥२०॥ क
थंमेतादृशंभाग्यंमुनेतद्वदनिश्चितम् ॥ ॥गणेशउवाच॥ ॥ इतित-
स्यवचःश्रुत्वाशरभंगोब्रवीद्वचः ॥२१॥ ॥शरभंगउवाच॥ ॥ दमयं-
तिशृणुवचोवक्ष्यामिहितकारकम् ॥ महासंकष्टशमनंसर्वकामप्रदंशुभम्
॥२२॥ भाद्रमासस्ययाकृष्णाचतुर्थीसंकटातुसा ॥ तस्यांपूज्योनरस्त्रीभि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रेकदंतोगजाननः ॥ २३ ॥ पूर्वोक्तेनविधानेनभक्त्याप्रीत्याचश्रद्धया ॥ व्रते
नानेनभोदेविलब्धकामाभविष्यसि ॥ २४ ॥ मुनिमांसेमहाराज इतिमेनिश्च
लामतिः ॥ ॥ गणेशउवाच ॥ ॥ दमयंतीतदाचक्रेसंकष्टव्रतमुत्तम
म् ॥ भाद्रेमासिकृतारंभागणनाथार्चनेरता ॥ २५ ॥ सप्तमासैःपतिंप्राप्तारा
ज्यंपुत्रंतथैवच ॥ तथैवसंपदंराजन्कृत्वाचैवंव्रतोत्तमम् ॥ २६ ॥ ॥ श्रीः
कृष्णउवाच ॥ ॥ तथापार्थव्रतादस्माद्राज्यंप्राप्स्यसिनिश्चितम् ॥ वैरि-
णस्तेपराभूताभविष्यंतिविशेषतः ॥ २७ ॥ इतितेकथितंभूपव्रतानामुत्तमं
व्रतम् ॥ करिष्यतिमहाभाग्यंसर्वदुःखनिवारणम् ॥ २८ ॥ ॥ इतिश्रीस्कंदपुरा
णेकृष्णयुधिष्ठिरसंवादेभाद्रपद कृष्णाचतुर्थीव्रतकथासमाप्ता ॥ २ ॥ ॥युधिष्ठिरउवाच ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृष्णाकृष्णमहाभागविश्रुतंव्रतमुत्तमम् ॥ आश्विनेमासियाकृष्णाचतुर्थी संकटास्मृता ॥ १ ॥ तस्यांकेनप्रकारेणपूजनीयोगणाधिपः ॥ तद्वदस्वज गन्नाथकृपयाममविस्तरात् ॥ २ ॥ ॥ श्रीकृष्णाउवाच ॥ ॥ इतिश्रुत्वा तदादेवीप्रहस्यवदनांबुजम् ॥ श्रोतुमिच्छाम्यहंदेवआश्विनेकीदृशंव्र तम् ॥ ३ ॥ ॥ श्रीगणेशउवाच ॥ ॥ आश्विनेमासिगिरिजेकृष्णा नामागणाधिपः ॥ पूजनीयोविधानेनपूर्वोक्तेनचसिद्धये ॥ ४ ॥ निराहारो- जितक्रोधोदंभलोभविवर्जितः ॥ मनसासंस्मरेद्देवंगणनाथंप्रपूजयेत् ॥ ५ ॥ चतुर्थीआश्विनेकृष्णासंकटाव्रतमुत्तमम् ॥ दूर्वाहरिद्रयाहोमात्ससद्वी पवतींलभेत् ॥ ६ ॥ एकदाबाणतनयानाम्नोषेतिप्रकीर्तिता ॥ प्रसुप्तापुष्पश

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यायामनिरुद्धं ददर्शसा ॥ ७ ॥नहियोगेनसंतप्तासानलेभे सुखंक्वचित्
॥ चित्रेरेखातदर्थंचविलिख्य भुवनत्रयम् ॥ ८ ॥ साच दृष्ट्वा सखींप्राहपति
र्दृष्टोमयानिशि॥ अनिरुद्धइतिख्यातोमयास्व प्नेविवाहितः ॥ ९ ॥ तमानयत्वं
सुश्रोणियेनकेनस्थलेनवा ॥ अन्यथातुचमे मृत्युर्भविताऽत्रनसंशयः ॥
१० ॥ चित्रलेखासखीश्रुत्वागत्वा द्वारवतीपुरीम् ॥ अनिरुद्धंजहाराथदैत्य
मायाविचक्षणा ॥ ११ ॥ बाणासुरपुरेनीतः संध्याधेनुसमागमे ॥ प्रद्युम्नः
पुत्रशोकेन तीव्रव्याधिप्रपीडितः ॥ १२ ॥ नकृष्णोपिसुखंलेभे दृष्ट्वापुत्रंतथा
विधम् ॥ रुक्मिणीविललापाथपौत्रदुःखेनपीडिता ॥ १३ ॥ गत्वाकृष्णांति
केसाब्रवीतमुवाचपराङ्मुखी ॥ प्राणात्प्रियोपिमेपौत्रः केननीतः क्ववागतः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शोकार्ताहंकरिष्यामिप्राणत्यागंत्वयेक्षितम् ॥ इतितस्यावचःश्रुत्वासभाया
मागतोहरिः॥१५॥तत्रापश्यदृषिश्रेष्ठंलोमशंतीव्रवर्चसम् ॥ प्रणम्याथमु
निंविष्णुर्वृत्तांतंचन्यवेदयत् ॥१६॥ ॥श्रीकृष्णउवाच ॥ ॥ मुनेलो
मशमेपौत्रः केननीतः क्ववागतः ॥ नाहंजानेहृतः केनपौत्रोमेक्वगतःसुधीः ॥
१७॥मातातस्यार्दितादुःखैःपुत्रंस्मृत्वापुनःपुनः॥ इतिकृष्णवचःश्रुत्वालोमशो
मुनिरब्रवीत्॥१८॥ ॥लोमशउवाच॥ ॥बाणासुरस्ययाकन्याउ
षानाम्नेतिविश्रुता॥ चित्रलेखासखीतस्याव्याजहारानिरुद्धकम् ॥ १९॥
गोपितोबाणनगरेकथयामासनारदः॥ आश्विनेकृष्णपक्षेतुचतुर्थीसंक
टाभवेत् ॥ २०॥ तदनुष्ठान[illegible]त्रेण पौत्रस्तेत्वागमिष्यति ॥ एवमुक्त्वामुनि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रेष्ठोदत्ताशीः प्रययौवनम् ॥२१॥ उपवेश्यमहाविष्णुंसंकष्टव्रतमुत्तमम् ॥ उप
दिष्टंकृतंतेनलोमशेनव्रतोत्तमम् ॥२२॥ तेनव्रतेनभोदेवि जितोबाणासुरोरि
पुः ॥ महादेवेनमत्पित्रारक्षितोपिमहामृधे ॥२३॥ चिच्छेदबाहुदंडानांसह
स्त्रंकुपितोहरिः ॥ सतद्व्रतप्रभावेननात्रकार्याविचारणा ॥२४॥ श्रीगणेशप्र
तुष्ट्यर्थंकृतविघ्नोपशांतये ॥ अनेनसदृशंनास्तिकार्यसिद्धिकरंपरम् ॥२५॥ नि
दानंतीर्थयात्रायांराजतेपृथिवीतले ॥ ॥श्रीकृष्णउवाच॥ ॥तस्माद्राजं
स्त्वयाकार्यमापद्धरणहेतुकम् ॥ विजेष्यसिरणेशत्रून्राज्यंसर्वमवाप्स्यसि ॥२६
॥एतद्व्रतस्यमाहात्म्यंनशक्यंवर्णितुंबुधैः ॥ अनुभूतंमयापार्थसत्यंसत्यंवदा
म्यहम् ॥२७॥ इतिश्रीस्कंदपुराणे आश्विनकृष्णसंकष्टचतुर्थीव्रतकथासंपूर्णा ॥ ३ ॥ ७९ ७९



For Private and Personal Use Only

पार्वत्युवाच ॥ ॥ लंबोदरमहाभागवदनोवदतांवर ॥ कार्तिकस्यासि
तेपक्षेकथंपूज्योगणाधिपः ॥ १ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ मातुर्वा-
क्यंनिशम्याथजगादगणनायकः ॥ कार्तिकस्यासितपक्षेसंकटायाचतुर्थि
का ॥ २ ॥ तस्यांपूज्योगणाध्यक्षः पिंगनामेतिविश्रुतः ॥ पूर्वोक्तेनविधानेन
भुंजीयादेकभक्तकम् ॥ ३ ॥ ब्राह्मणान्भोजयेत्पश्चात्स्वयंभुंजीतवाग्यतः ॥
एतद्व्रतस्यमाहात्म्यंश्रृणुवक्ष्यामिसादरम् ॥ ४ ॥ ऊर्जकृष्णाचतुर्थ्यांतुसंक
ष्टव्रतमुत्तमम् ॥ माषान्नैश्चघृतैर्होमैः सर्वसिद्धिर्भवेन्नृणाम् ॥ ५ ॥ ॥ गणे
शउवाच ॥ ॥ वृत्रासुरामहादैत्योवृद्धिमापसमंततः ॥ त्रिलोकींसकलांजि
त्वासर्वेदेवाःपराजिताः ॥ ६ ॥ स्थानभ्रष्टास्ततोजग्मुःकातराःसर्वतोदिशम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिवौकसश्चसेंद्रास्तेविष्णुंशरणमाययुः ॥ ७ ॥ तदुक्तंतुनिशम्याथविष्णुःप्रो
वाचनिर्जरान् ॥ समुद्रस्याभयंलब्ध्वाप्रबलास्तेतिदुर्मदाः ॥ ८ ॥ अवध्यादेव
तानांतुवरमापुःपितामहात् ॥ अगस्त्यस्तोषितःसर्वंसंपास्यत्यंबुधिंमुनिः ॥
॥ ९ ॥ आयास्यतिपुनःस्वर्गंपितुरंतेयथासुखम् ॥ तस्मान्मुनेःसहायेनयुष्मत्का
र्यंभविष्यति ॥ १० ॥ श्रुत्वाऽगस्त्याश्रमंगत्वातुष्टुवुर्मुनिसत्तमम् ॥ मुनिःप्रसन्न
स्तान्प्राहमाभैरितिसुनिश्चितम् ॥ ११ ॥ ततोदेवादिवंजग्मुरगस्त्यश्चिंतयातुरः
॥ कथंपेयःसमुद्रोयंलक्षयोजनविस्तरः ॥ १२ ॥ तदागणेश्वरंस्मृत्वासंकष्टव्र
तमुत्तमम् ॥ चकारविधिनासम्यगगस्त्यश्चमहामुनिः ॥ १३ ॥ त्रिभिर्मासैर्ग-
णाध्यक्षःप्रसन्नःसमजायत ॥ तत्प्रभावादगस्त्येनपीतःपाथोनिधिःसुखम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥१४॥ एतस्यैवप्रभावेननिघातकवचादयः॥ अर्जुनेनजिताःसर्वेरिपवोव्रतरा
जतः॥१५॥एवमुक्तोगणाध्यक्षोनिशम्यपार्वतीतदा॥ ममपुत्रोजगद्वंद्यःसर्व
सिद्धिप्रदायकः॥१६॥ तस्मात्त्वमपिराजेंद्रव्रतमेतत्समाचर॥ विजेष्यसिशत्रु
संघान्राज्यंप्राप्स्यसिसत्वरम्॥१७॥ अश्वमेधसहस्राणिवाजपेयशतानिच
॥ कथाश्रवणमात्रेणपुत्रपौत्रादिवर्धनम्॥१८॥ इतिश्रीस्कंदपुराणेकार्तिककृष्णाचतुर्थी
व्रतकथासमाप्ता॥४॥ ॥ ॥पार्वत्युवाच॥ ॥ मार्गशीर्षेतुयाकृष्णाचतु-
र्थीसंकटाभवेत्॥ तस्यांकेनप्रकारेणपूजनीयोगणाधिपः॥१॥ ॥श्री
गणेशउवाच॥ ॥अत्रमासेगणेशस्तुगजाननइतिस्मृतः॥ दत्वार्घ्यंतु
विधानेनपूर्वोक्तेनहिमाद्रिजे॥ २॥ निराहारेणकर्तव्यंब्राह्मणांश्चैवभो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जयेत् ॥ व्रतेनचहोमयेद्द्रव्यंवैरीवश्यत्वमाप्नुयात् ॥ ३ ॥ अत्राप्युदाहरंतीम
मितिहासंपुरातनम् ॥ त्रेतायुगेसमाख्यातोराजादशरथःपुरा ॥ ४ ॥ मृगया
रसिकश्चासीद्ब्राह्मणस्तत्रपीडितः ॥ शशापतंद्विजश्रेष्ठःपुत्रशोकान्मरिष्य
सि ॥ ५ ॥ उद्विग्नमनसाराज्ञाकृतापुत्रेष्टिरद्भुता ॥ चतुर्व्यूहावतारेणरामोज
ज्ञेजगत्प्रभुः ॥ ६ ॥ तत्पत्नीजानकीजातालक्ष्म्याःप्रतिनिधिःसती ॥ पितुर्नि
योगाद्रामोपिससीतोलक्ष्मणान्वितः ॥ ७ ॥ वनंजगामविश्वात्मानिर्दहन्रक्ष
साकुलम् ॥ तत्रसीतांजहाराथरावणोलोकरावणः ॥ ८ ॥ सीतावियोगतोरामो
जनस्थानंस्वयंजहौ ॥ ऋष्यमूकगिरौमैत्रीसुग्रीवेणतदाभवत् ॥ ९ ॥ हनुम
त्प्रमुखाःसर्वेऽन्वेषणेजग्मुरातुराः ॥ सीतायास्तत्रसंपातिर्ददृशुर्वानरान्पुनः



For Private and Personal Use Only

॥१०॥संपातिःप्राहतान्सर्वान्केयूयंवनमागताः॥केनवाप्रेषिताःकार्यंकिं
वाचात्रप्रवर्तते॥११॥इतितस्यवचःश्रुत्वावानराजगदुःपुनः॥रामोदाशर
थिर्नामस्वयंविष्णुर्जगत्पतिः॥१२॥ससीतालक्ष्मणसखोदंडकारण्यमाय
यौ॥तत्रसीताहृताकेननेदंविद्मोवयंसखे॥१३॥इतितस्यवचःश्रुत्वासंपा
तिःप्राहबुद्धिमान्॥यूयंसखायःसर्वेनोवयंरामस्यकिंकराः॥१४॥जानीमो
जानकीयत्रयेननीतासतीयथा॥जटायुर्मेऽनुजोभ्रातासीतार्थेप्राणपंच
कम्॥१५॥तत्याजरावणंबुद्ध्वास्मृत्वारामपदांबुजम्॥इतोविदूरेपाथो
धिस्तत्पारेरक्षसांपुरी॥१६॥शिंशपातरुमाश्रित्यतत्रसीतास्तिदृश्यता
म्॥रावणेनहृतासीतामयाचाद्यापिदृश्यते॥१७॥वानरेषुचसर्वेषुहनुमां

स्तीव्रविक्रमः॥तेनतत्रप्रगंतव्यंसत्यंसत्यंवदामिवः॥१८॥बलेनलंघितुंसिं
धुर्नान्यथालंघितुंक्षमः॥ इतितस्यवचःश्रुत्वाहनूमान्प्राहबुद्धिमान्॥१९॥
संपातेकेनमार्गेणगंतव्योदुस्तरोंबुधिः॥अशक्तावानराःप्ररव्यमहमेकःसमा
गतः॥२०॥ इतितस्यवचःश्रुत्वासंपातिःपुनराहतम्॥संकष्टनाशनंचैवव्रतं
कार्यंत्वयासरवे॥२१॥ एतद्व्रतप्रभावेनतरिष्यस्यंबुधिंक्षणात्॥संपातेरुप
देशेनसंकष्टव्रतमुत्तमम्॥२२॥ कृतंहनूमतादेविलंघितोवारिधिःक्षणात्॥
नेदृशंवर्ततेलोकेव्रतमन्यत्सुरवप्रदम्॥२३॥ ॥श्रीकृष्णउवाच॥ ॥
तस्मात्त्वमपिराजेंद्रव्रतमेतत्समाचर॥हत्वाऽहंवैरिपून्सर्वान्संपदंप्राप्स्य-
सिक्षणात्॥२४॥ ॥इतिश्रीस्कंदपुराणेमार्गशीर्षकृष्णचतुर्थीव्रतकथासंपूर्णा॥५॥ ॥

पार्वत्युवाच ॥ ॥ पौषेमासिकथंपुत्रपूजनीयोगणाधिपः ॥ किंनामभोजनेकिं
स्यात्तद्वदस्वसमासतः ॥ १ ॥ ॥ श्रीगणेशउवाच ॥ ॥ पौषेमासिमहादेवि
विघ्नहर्त्रीचतुर्थिका ॥ तस्यांलंबोदरः पूज्यःप्रियंगोमूत्रमेवहि ॥ २ ॥ ब्राह्मणान्भो
जयेद्भक्त्याव्रतीपूर्ववदाचरेत् ॥ निराहारोजितक्रोधोजितनिद्रोह्यलंपटः ॥ ३ ॥
हविष्यान्नघृतैर्होमंराजवश्यार्थमेवच ॥ अत्रैवोदाहरंतीममितिहासंपुरातनं ॥
एकदारावणोगर्वाज्जयित्वास्वर्गवासिनः ॥ संध्यास्मरणकालेतुवालिंदध्रेस
पृष्ठतः ॥ ५ ॥ सतुकक्षाप्रदेशाभ्यांगृहीत्वाविहसन्बली ॥ आकाशमार्गमास्थि
त्यकिष्किंधांप्रययौपुरीम् ॥ ६ ॥ अंगदस्यतुपुत्रस्यकृत्वाक्रीडनकंतदा ॥ रज्ज्वा
गलेनिधायाथचालयामासरावणम् ॥ ७ ॥ जहसुर्नागराः सर्वेलंकानाथंविलो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्यतम् ॥ येनबाहुबलेनैवजितादेवाःसवासवाः॥ ८ ॥ सोऽयंबध्वागलेनित्यं
राजपुत्रेणनीयते॥ इतिपौरवचःश्रुत्वारावणस्यपितःश्वसन् ॥ ९ ॥ नष्टगर्व
स्तुपौलस्त्यःसस्मारस्वपितामहम्॥ श्रुत्वाआर्तस्वपौत्रंचदर्शयंकुलईदृशीं
॥ १० ॥ अतिगर्वात्पतिष्यंति असुरासुरमानवाः॥ पुलस्त्योरावणंप्राहकिमर्थं
स्मरसेमम॥ ११ ॥ ॥ रावणउवाच ॥ ॥ देवानांविजयाद्गर्वात्समये
जातमीदृशम् ॥ संध्यास्मरणकालेतुबद्धःकश्चित्कपीश्वरः ॥ १२ ॥ प्रतिच्यां
वारिधेस्तीरेगृहीतःपृष्ठभागतः॥ विपरीतंकृतंतेनबंबंधपुनरेवमाम्॥ १३॥
अत्रानीतोगलेबध्वापुत्रस्यक्रीडनंकृतम्॥ धिक्कुर्वन्मांप्रहसंतिलोकाग्राम
पुरौकसः॥ १४॥ इतिचिंताकुलोदेवनिर्बलःकिंकरोम्यहम् ॥ तस्मान्नाथत्व



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यारक्ष्योमादृशोगोत्रदूषितः ॥१५॥ ॥पुलस्त्यउवाच॥ ॥शृणुराव
णमाभैष्टमोचयिष्यामिबंधनात् ॥ अयंसुरपतेर्वीर्येत्वत्तुल्योस्तिपराक्रमे
॥१६॥ रामोदाशरथिर्नामतेनवध्योभविष्यति ॥ एतस्माद्बंधनान्मोक्तुंयदी-
च्छेराक्षसाधिप ॥ १७॥ तदासंकष्टनाशाख्यंव्रतंकुरुममाज्ञया ॥ वार्त्रहत्यो-
द्भवेदुःखेकृतमिंद्रेणवैपुरा ॥१८॥ तस्मात्त्वमपिसंकष्टनाशनंव्रतमुत्तमम्
॥समाचराविलंबेनक्लेशनाशोभविष्यति ॥ अगस्त्यस्योपदेशेनरावणेनव्र
तंकृतम् ॥१९॥ तस्यप्रभावतोदेविलत्क्षणान्मुक्तबंधनः ॥ रावणःप्रापस्वंराज्यं
यथासुखमनिंदितम् ॥२०॥ कुरुपार्थमहाबाहोव्रतमेतद्यथाश्रुतम् ॥ निहत्य
संगरेशत्रून्प्राप्स्यसेराज्यमुत्तमम् ॥२१॥ ॥ इतिश्रीस्कंदपुराणेपौषकृष्णाचतुर्थीव्रतकथास

For Private and Personal Use Only

भाशा ॥ ६ ॥ ॥ पार्वत्युवाच ॥ ॥ कथंगणेश्वरः पूज्योमाघेकिंभोजनंसु
त ॥ किंनामकिंचनैवेद्यंतद्वदस्वविशेषतः ॥ १ ॥ ॥ श्रीगणेशउवाच ॥ ॥
माघमासेगणाध्यक्षंभालचंद्रंप्रपूजयेत् ॥ श्रद्धयापूजयेद्देवंषोडशैरुपचारकैः
॥ २ ॥ मोदकान्कारयेन्मातस्तिलजान्दशपार्वति ॥ देवाग्रेस्थापयेत्पंचपंच-
विप्रायकल्पयेत् ॥ ३ ॥ पूजयित्वातुतंविप्रंभक्तिभावेन देववत् ॥ दक्षिणांच
यथाशक्त्यामोदकान्पंचदापयेत् ॥ ४ ॥ स्वयंदशतिलान्देविभुंजीयाद्भक्ति
तत्परः ॥ इतिहासंप्रवक्ष्यामीहरिश्चंद्रस्यभूपतेः ॥ ५ ॥ आसीत्पूर्वयुगेराजा
हरिश्चंद्रः प्रतापवान् ॥ क्षत्रधर्मरतःसाधुःसत्यसंधोद्विजार्चकः ॥ ६ ॥ नाध-
र्मो दृश्यते देवितस्मिन्राज्यंप्रशासति ॥ नहीनवदनः कश्चिन्नदुःखीनदरिद्र

वान् ॥ ७॥ नचव्याधिभयंकिंचिदल्पायुर्ननरोभवेत् ॥ तस्यराज्येभवद्दिप्र
ऋष्यशर्मेतितापसः ॥ ८॥ तस्याचिरेणकालेनबभूवतनयः प्रियः ॥ ऋष्यश
र्मागतः स्वर्गेपत्नीपुत्रंररक्षच ॥ ९॥ भिक्षाशिनीमहादीनापुत्रलालनतत्प
रा ॥ दरिद्राकारयामाससंकष्टव्रतमुत्तमम् ॥ १०॥ गोमयस्यगणाध्यक्षं
पूजयंतीसदासती ॥ कृत्वाभिक्षांतिलानांतुमोदकान्दशपार्वती ॥ ११॥ य
थोक्तेनविधानेनतावत्पुत्रोयदृच्छया ॥ गलेविनायकंबध्वाक्रीडनायबहि
र्गतः ॥ १२ ॥ कुलालश्चततस्तस्याः पुत्रंवैपंचहायनम् ॥ गृहीत्वाप्रद
दौवह्नौपात्रपाकेच्छयाकुधीः ॥ १३ ॥ अन्वेषयंतीसापुत्रंनलेभेकापि-
विह्वला ॥ पूजयंतीगणाध्यक्षंविललापातिदुःखिता ॥ १४ ॥ भोगणेशम

हाकायसूर्यारुणसमप्रभ ॥ जटाकलापसुभगत्राहिमांपुत्रदुःखिताम् ॥ १५
गजाननचतुर्बाहोभालचंद्रविनायक ॥ अनाथनाथवरदपाहिमांपुत्रदुःखि
ताम् ॥ १६ ॥ एवंविलापंकुर्वतीनिशार्धंचतदासती ॥ ततःकुलालःप्रातस्तु
पात्रपाकदिदृक्षया ॥ १७ ॥ अवाहमुत्सृजंस्तत्रबालकंक्रीडनेरतम् ॥ ददर्श-
जानुदघ्नंचजलेतिष्ठंतमद्भुतम् ॥ १८ ॥ दृष्ट्वासवेपथुस्तूर्णंजगामनृपमंदिरम्
॥ तत्रगत्वाजगादाथनृपस्याग्रेयथाकृतम् ॥ १९ ॥ ॥ कुलालउवाच ॥ ॥
हरिश्चंद्रमहाबाहोज्वलदग्निसमप्रभ ॥ वध्योहंसुतरांराजन्येनकर्मेदृशंकृत
म् ॥ २० ॥ राजन्कन्याविवाहर्थंमृत्पात्राणिपुनःपुनः ॥ ददाहपरिपक्कानिनजाता
निकथंचन ॥ २१ ॥ तदाप्यपृच्छंभीतोहंमंत्रिणंचेटकेस्थितम् ॥ समांबालबलिं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दद्यादितिमाहृरक्षःस्थितः ॥२२॥ तदाऽहंचिंतयामासकस्यगृह्णामिबालकम् ॥ यस्यबालंददाम्यग्रेोसमांछेत्स्यतिसत्वरम् ॥२३॥ इतिभीत्यामहाराजरंडिकातनयंबलिम् ॥ कृत्वामृत्पात्रनिवहंददाम्यग्निंसुनिश्चितम् ॥२४॥ सच माहनिजांभार्यामृषिशर्मामृतोद्विजः ॥तत्पत्नीरंडिकानित्यंभिक्षाकृत्योपजीविनी ॥२५॥साकरिष्यतिकिंबालेतत्पुत्रोयंमयाहृतः॥ पक्कपात्राणिसर्वाणिकार्यमेचभविष्यति ॥२६॥ इतिराज्ञोसुखंसुस्वाप्रातःपात्रदिदृक्षया ॥ गतस्तत्रावमुच्याथयावत्पश्यामिसत्वरम् ॥२७॥तावद्वालोयथानीतस्तथातिष्ठतिनिर्भयः ॥ दृष्ट्वासमागतोत्राहंसकंपोजातसंभ्रमः॥२८॥ इतितस्यवचःश्रुत्वाराजाविस्मितमानसः॥ आजगामाशुतत्रैवयत्रबालःसमोदते॥

For Private and Personal Use Only

॥२९॥ दृष्ट्वा तथाविधं बालं राजाऽमात्यमुवाच ह ॥ किमिदं कस्य बालोयमि
तित्वं निश्चयं कुरु ॥ ३०॥ जानुदघ्नं कुतः प्राप्तं जलं जलजमंडितम् ॥ वैदूर्यस
दृशी दूर्वा दारिद्र्यस्य यथैव हि ॥ ३१॥ नदाहो न क्षुधा तस्य नापि पासापि वर्तते ॥
निर्भयं तु यथा गेहे तथा क्रीडति बालकः ॥ ३२॥ एवं निगदिते राज्ञि ब्राह्मणी सास
मागता ॥ क्रोशंती बालकं दृष्ट्वा स्ववत्सं सुरभिर्यथा ॥ ३३॥ समुत्थाय निजं बा
लं समालिंग्य चुचुंब ह ॥ रुदंती कंपमाना सा नृपस्याग्रे न्यषीदत ॥ ३४॥ ॥
हरिश्चंद्र उवाच ॥ ॥ विप्रपत्नि कुतो बालो नाग्निना भस्मसात्कृतः ॥ चेटकं
किं विजानासि को धर्मश्च त्वया कृतः ॥ ३५॥ ॥ ब्राह्मण्युवाच ॥ ॥ चेटकं
न विजानामि न धर्मं न तपस्तथा ॥ न योगं न च दानं च न विधानं बलिं पुनः ॥ ३६॥



For Private and Personal Use Only

संकष्टनाशनंचैवंकरोमिव्रतमुत्तमम् ॥ तत्प्रभावेणराजेंद्रजातोमेकुशलीसुतः ॥३७॥ इतितस्यवचःश्रुत्वापुनःप्राहसभूपतिः ॥ व्रतमेतत्प्रजाःसर्वाःकुर्वंतुममसंमतम् ॥ ३८॥ राजातांचपरिक्रम्यधन्यासाध्वीतिभारत ॥ पूजनीयोगणाध्यक्षःसर्वैःपौरजनैस्तदा ॥ ३९॥ मासिमासिव्रतंचक्रुःसर्वेविस्मयसंयुताः ॥ ब्राह्मणीसासुतंलेभेव्रतराजप्रभावतः ॥४०॥ ॥श्रीकृष्णउवाच॥ ॥ तस्मात्पार्थत्वयाकार्यंव्रतानामुत्तमंव्रतम् ॥ एतद्व्रतप्रभावेणलब्धकामोभविष्यसि ॥४१॥ राज्यंप्राप्यतथामित्रंपुत्रपौत्रसुखावहम् ॥ यःकरोतिव्रतंराजन्सर्वसिद्धिप्रदायकम् ॥ ४२॥ ॥इतिश्रीस्कंदपुराणेमाघकृष्णचतुर्थीव्रतकथासंपूर्णा॥ ७ ॥

॥ ॥पार्वत्युवाच॥ ॥फाल्गुनस्यासितेपक्षेकथंपूज्योगणेश्वरः ॥

किंनामभोजनंकिंचतन्मेब्रूहिगजानन॥१॥ ॥गणपतिरुवाच॥ ॥
मातःफाल्गुनमासेतुहेरंबाख्योगणेश्वरः॥पूजनीयोविधानेनप्रोक्तेनेनयथा-
क्रमम्॥२॥पायसैःकरवीरैश्चपुष्पैर्वश्यैश्चहोमयेत्॥ घृतंचशर्कराचैवभोज
नंकथ्यतेबुधैः॥३॥इतिहासंप्रवक्ष्यामियथापूर्वंसमीरितम्॥युधिष्ठिरेण
संपृष्टंकृष्णेनकथितंयथा॥४॥ ॥श्रीकृष्णउवाच॥ ॥आसीत्कृत-
युगेराजायुवनाश्वइतिस्मृतः॥धार्मिकःसुवदान्यश्चदेवब्राह्मणपूजकः॥
५॥तस्यराज्येभवद्विप्रोविष्णुशर्मामहातपाः॥वेदशास्त्रार्थतत्वज्ञोधर्मशा
स्त्रार्थकोविदः॥६॥तस्यासंस्तनयाःसप्तधनधान्यसमावृताः॥मिथःक्रोधा
च्चवैजातास्तस्यसर्वेपृथक्पृथक्॥७॥पितातेषांक्रमेणैवभुंजीयात्प्रतिवासर

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

म् ॥ एवंबहुतिथेकालेवृद्धोजातःसुनिर्बलः ॥ ८ ॥ ततःसर्वाःस्नुषास्तस्यनादरंवि
दधुस्तथा॥ यथापूर्वंतदावृद्धोदुःखार्तस्तुरुरोदह॥ ९॥ एकदाविष्णुशर्माचव्र
तंसंकष्टनाशनम् ॥ कृतवान्श्रद्धयाज्येष्ठःस्नुषायामंदिरंययौ॥ १०॥ ॥
विष्णुशर्मोवाच॥ ॥ स्नुषेममव्रतस्यास्यसामग्रीप्रतिपाद्यताम् ॥यथासंतो
षितोदेवोददातिविपुलंधनम्॥ ११॥ इतिब्रुवतिविप्रेंद्रेस्नुषातंप्राहनिष्ठुरम् ॥ता
तमेनावकाशोस्तिगृहाचारस्यकारणात् ॥ १२॥ चेटकंनाटकंतस्मात्त्वयातात
विधीयते॥ नाहंव्रतंविजानामिकोगणेशःप्रयात्वतः ॥ १३॥ एवंनिराकृतोविप्रः
षट्पुत्राणांगृहेगतः ॥ताभिस्तिरस्कृतोदीनोनिर्बलःक्लेशपीडितः ॥ १४॥ स्नुषा
याश्चकनिष्ठायागृहेगत्वान्यषीदत॥ अतिदीनांदरिद्रांतांविज्ञायप्रब्रवीद्वचः १५

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ॥विप्रउवाच॥ ॥स्नुषेकयामिवृद्धोहंपुत्रैःस्त्रीभिर्निराकृतः॥तव
गेहेनपश्यामिधनंकिंचिद्रुतेमम॥१६॥ सिद्धिर्भवतिकल्याणिचिंतयामिपु
नःपुनः॥ इतितस्यवचःश्रुत्वाकनिष्ठाप्राहसादरम्॥१७॥ ॥कनिष्ठोवाच
॥ ॥किमर्थंखिद्यसेतातव्रतंकुरुयदृच्छया॥ उपोष्येऽहंव्रतंभक्त्यासदासं
कष्टनाशनम्॥१८॥ सिद्धिस्तुभविताशीघ्रंहेरंबस्यप्रसादतः॥ इत्युक्त्वासास्नु
षाग्रामेभिक्षांकृत्वागतागृहे॥१९॥आत्मार्थेश्वशुरस्यार्थेकुर्वतीमोदकान्पृ
थक्॥ चंदनंसुमनोदूर्वाशुभाक्षतफलानिच॥२०॥ धूपंदीपंचनैवेद्यंसतांबू
लंपृथक्पृथक्॥ पूजयित्वागणाध्यक्षंश्वशुरेणसमंसती॥२१॥श्वशुरंभोज १७
यित्वाथसम्यक्प्रीत्यासुशोभना॥निराहारास्वयंतस्थौभोजनाभावतोदिने॥२२

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निशीथेश्वशुरस्तस्याव्रतंचक्रेपुनःपुनः ॥ पुरीषंचतदादेधिनमलेमानसेस्नुषा ॥ २३ ॥ जलंगृहीत्वातत्पादौक्षालयंतीशुशोचसा ॥ कस्मात्तवेदृशीजातादशामे मंदभाग्यतः ॥ २४ ॥ किंकरोमिक्वगच्छामिलाततद्दमाचिरम् ॥ विलपंतीस्नुषा रात्रौतावदभ्युदितोरविः ॥ २५ ॥ सातत्रददृशेसाध्वीरत्नानामुच्चतेजसाम् ॥ ही-राणांमणिमुक्तानांराशिंविद्रुमतवर्जितम् ॥ २६ ॥ संभ्रमाच्छ्वशुरंप्राहअत्या श्चर्ययुतासती ॥ ददृशेविस्मितासाचकिमिदंकस्यसंपदः ॥ २७ ॥ धनंकस्य इदंसाक्षान्महहेमणिविद्रुमाः ॥ श्वसुरःकस्यत्वायातःकोवाक्षित्वागतोधुना ॥ २८ ॥ इतितस्यावचःश्रुत्वावृद्धोवचनमब्रवीत् ॥ तवश्रद्धाफलंभद्रेसंतुष्टः-श्रीगणाधिपः ॥ २९ ॥ व्रतस्यास्यप्रभावेणसंपत्तिःप्रकटागृहे ॥ धन्योगणेश्वर-

For Private and Personal Use Only

ग.व्र. स्त्वंतुश्वशुरस्त्वत्प्रसादतः ॥३०॥ दारिद्र्यनाशनंजातंगृहेमेसुखसंपदः ॥त्वत्प्र कथा.
१८ सादादहंधन्याइतिसाश्वशुरंब्रवीत्॥ ३१॥ दृष्ट्वातांचुकुपुःसर्वेषट्पुत्राद- फा.
यितान्निजाः॥ विष्णुशर्माचतान्सर्वान्समुवाचभयातुरः॥ ३२॥नायंदोषो
ममाप्यस्तिनवैषम्यंमयाकृतम् ॥ किंतुतुष्टोगणाध्यक्षोव्रतस्यास्यप्रभावतः
॥३३॥तेनसंपत्प्रादुरभूद्धनदस्ययथापुरा॥ स्नुषाभिर्निकृतःपश्चाद्ययौत
स्यागृहेऽबलः॥ ३४॥ ॥श्रीगणेशउवाच॥ ॥ततस्तेतनयास्तस्य
दारिद्र्यव्याधिपीडिताः ॥ बभूवुर्गिरिजेचैकोवासवेनसमोऽभवत्॥ ३५ ॥
तेपिसर्वेव्रतंचक्रुःप्रतिस्पर्धात्परस्परम् ॥तस्यव्रतप्रभावेणसर्वेसंपत्तिनोऽ १८
भवन्॥ ३६॥ अन्येपियेविधानेनव्रतंकुर्वंतिमानवाः ॥तेषांगृहेधनंधा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यंश्रीगणेशप्रसादतः ॥ ३७॥ ॥श्रीकृष्णउवाच॥ ॥ अनेनैवविधानेनपुरुषःपुरुषर्षभ ॥ पार्थिवत्वंलभेत्पार्थश्रीगणेशव्रतेनच॥ ३८॥तस्मात्त्वमपिराजेंद्रकुरुशीघ्रंव्रतोत्तमम् ॥ दुःखराशिंविमुच्याथसुखसंपत्तिमान्भवेः ॥ ३९॥ ॥ इतिश्रीस्कंदपुराणेफाल्गुनकृष्णाचतुर्थीव्रतकथासंपूर्णा॥ ८॥ ॥

॥ ॥पार्वत्युवाच ॥ ॥कथंगणेश्वरःपूज्योभोजनंकिंप्रकीर्तितम्॥ कोनामकोविधिस्तस्यास्तन्मेवदगजानन॥ १ ॥ ॥गजाननउवाच॥ ॥ चैत्रेमासिमहादेविविकटोगणनायकः ॥पूजनीयोविधानेनपंचगव्यंपिबेद्व्रती ॥ २॥चैत्रेकृष्णाचतुर्थीयाव्रतंसंकष्टनाशनम् ॥ बीजपूरैर्घृतैर्होमैर्वंध्यास्त्रीपुत्रमाप्नुयात् ॥ ३॥ इतिहासंप्रवक्ष्यामिगिरिजेपरमाद्भुतम्॥ यस्यस्मर

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




पामात्रेणकार्यसिद्धिंलभेन्नरः ॥ ४ ॥ आसीत्पुराकृतयुगेराजावैमकरध्वजः
॥ प्रजाःपालयतस्तस्यदरिद्रोनभवेत्कश्चित् ॥ ५ ॥ स्वेस्वेधर्मेरतावर्णानिरा
तंकानिरीहयः ॥ दांताःकांतावदान्याश्चधर्ममार्गपरायणाः ॥ ६ ॥ नाभवत्पुत्र
एकोपिराज्ञिराज्यंप्रशासति ॥ याज्ञवल्क्यप्रसादेनपश्चात्पुत्रोप्यजायत ॥ ७
॥ धर्मपालाभिधेमात्येस्थाप्यराज्यंसभूपतिः ॥ लालयामासतत्पुत्रंनानाक्री
डनकैर्नृपः ॥ ८ ॥ धर्मपालोवभूवाथधनधान्यसमृद्धियुक् ॥ अजायंतसुताः
पंचतस्यामात्यस्यसुंदराः ॥ ९ ॥ नानाविधाःकृतोद्वाहाधनभोगपरायणाः ॥
कनिष्ठाचागतातस्यस्नुषासाध्वीपतिव्रता ॥ १० ॥ आगतेचैत्रमासेतुकृष्ण
पक्षेपुनःपुनः ॥ पूजयंतीगणाध्यक्षंभक्तिभावसमन्विता ॥ ११ ॥ इदंदृष्ट्वा



For Private and Personal Use Only

व्रतंतस्याश्वश्वशुरस्तुलदाऽब्रवीत् ॥ किंकर्मन्चेटकंकृत्वावशीकरणमुद्यता ॥१२
॥ बहुवारं निषिद्धापिननिवर्ततिदुष्टधीः ॥ त्वांदुष्टंताडयिष्यामिनाहंजानामिचे
टकम् ॥१३॥ व्रतंकरिष्येहंश्वश्वश्रोःसंकष्टाख्यंफलप्रदम् ॥ इतिश्रुत्वातदाश्वश्रूः
प्रोवाचवचनंसुतम् ॥१४॥ पुत्रभार्यातवत्वेषाचेटकंकर्तुमुद्यता ॥ बहुवारंनि
षिद्धापिनानिवर्ततिदुष्टधीः ॥१५॥ ताडयेनांमहादुष्टांनाहंजानामिकिंव्रतम् ॥
कोगणेशोस्तिकःक्लेशोयंविनाशयतिध्रुवम् ॥१६॥ पित्रैवंप्रेरितःपुत्रस्ताडया
मासतांमुहुः ॥ क्लेशितापीडितासाचव्रतंकृत्वागणेश्वरम् ॥१७॥ ध्यायंतीप्रार्थनां
चक्रेत्वंगणेशजगत्पते ॥ क्लेशंदर्शयहेरंबश्वश्रोश्वश्वशुरस्यच ॥१८॥ येनैषा
जायतेभक्तिर्व्रतेतवगणाधिप ॥ लंबोदरस्तथाचक्रेतद्भक्त्याविहसान्विभुः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥१९॥ पश्यतांसर्वलोकानांभूपतेस्तनयंविभुः॥ तदाप्रायच्छद्दिश्वात्माधर्मपा
लस्यमंदिरे॥२०॥ पश्चाज्जहारतद्रत्नंभूषणाभरणानिच॥ राजगेहेविनिक्षि
प्यतत्रैवांतरधीयत ॥२१॥ ततोराजास्वपुत्रंचस्वयमाहूयसत्वरम्॥ अमात्य
स्यगृहेगत्वामत्पुत्रः क्वगतोधुना॥२२॥ भूषणानिचसर्वाणिवस्त्रंलब्ध्वानपुत्र
कः॥ कस्यकर्मइदंरौद्रं क्वगतोममपुत्रकः॥२३॥ इतिनृपवचःश्रुत्वामंत्रीप्रत्यु
त्तरंददौ॥ क्वगतोहंनजानामित्वत्पुत्रोनृपदुर्धरः॥२४॥ शोधयिष्यामितत्सर्व-
पुरंनगरवाटिकाम्॥ राजातदाबभाषेचक्रुद्धोपिभृत्यकिंकरान्॥२५॥ भटाः-
शीघ्रंविचिन्वंतुमंत्रिणोममपुत्रकम्॥ दूतास्तत्रव्यधावंतनगरेषुवनेषुच॥२६॥
ततोनलब्धःपुत्रापिदूताराजसमीपकम् ॥ जगदुर्भयभीतास्तेराजन्नप्राप्तत-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्कराः॥२७॥ कुमारोनगरेनास्तियथान्योपवनेषुच॥ दृष्टःप्रविष्टंसर्वेषुनदृष्टोनि
र्गतःपुनः॥२८॥ इतितेषांवचःश्रुत्वाराजामंत्रिणमाह्वयत्॥तमाहूयमहाराजपृ
ष्टवान्कुत्रमेसुतः॥२९॥ धर्मपालकमेपुत्रःसत्यंवदममाग्रतः॥ कस्मादाभरणंव-
स्त्रंदृश्यतेनममात्मजः॥३०॥ दुष्टत्वांवधयिष्यामित्वत्कुलंनात्रसंशयः॥एवंव
दतिराजेंद्रेमंत्रीविस्मितमानसः॥३१॥ प्रणिपत्यनृपंप्राहशोधयिष्यामिभूपते॥
राजन्नात्रपुरेयोगीनचदूतानतस्कराः॥३२॥नजानेईदृशंकर्मकृतंकुत्रगतःप्र
भो॥ धर्मपालोगृहंगत्वापुत्रान्पप्रच्छचस्त्रियम्॥३३॥स्नुषाःसर्वाःसमाहूयकेने
दंकर्मचाद्भुतम्॥ममभाग्यविहीनस्यकुलंराजावधिष्यति॥३४॥श्वशुरस्यव
चःश्रुत्वावधूर्वचनमब्रवीत्॥ किमर्थंतप्यतेतातकोपंकृत्वाजनाधिपः॥३५॥

For Private and Personal Use Only

गं.न्न. ॥तस्माच्चात्रप्रयत्नेनपूजनीयोगणाधिपः॥जनाराजादयःसर्वेसस्त्रीकाःपुरवासि कथा.
२१ नः॥३६॥व्रतंकुर्युर्विधानेनचतुर्थीकष्टनाशनम्॥राजपुत्रस्यप्राप्तिःस्यान्नमेवाचो चै.
वृथाप्रभो॥३७॥इतितस्यावचःश्रुत्वाश्वशुरःप्रणतांजलिः॥धन्यापुत्रवधत्वा-
च्चकुलंमांचोद्धरिष्यति॥३८॥यथागणेश्वरःपूज्योमांवदस्वकृपानिधे॥एतद्व्र
तस्यमाहात्म्यंनज्ञातंमंदबुद्धिना॥३९॥तत्क्षमस्वतुकल्याणिराजपुत्रंप्रदर्शय॥
तदासर्वेव्रतंचक्रुश्चतुर्थीकष्टनाशनम्॥४०॥राजादयःप्रजाःसर्वाहेरंबतुष्टिहेत
वे॥तदाप्रसन्नोभगवान्श्रीगणेशोव्रतेनच॥४१॥पश्यतांसर्वलोकानांराजपुत्रंददर्श
ह॥राजपुत्रंतदादृष्ट्वाविस्मिताःपुरवासिनः॥४२॥प्रसन्नाःसकलालोकाराजाह २१
र्षमुपागतः॥धन्योगणेशःसाधन्यामंत्रिपुत्रवधूःशुभा॥४३॥यस्याश्चकृपया

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राप्तः पुत्रोवैवस्वताद्यतः ॥ तस्मात्सर्वप्रयत्नेनव्रतंकुर्युःसुतप्रदम् ॥ ४४ ॥ ॥
श्रीकृष्णउवाच ॥ ॥ नातःपरतरंभूपत्रिषुलोकेषुविद्यते ॥ अनेकक्लेशशांत्यर्थं
व्रतंकुरुकुरूद्वह ॥ ४५ ॥ ॥ इतिश्रीस्कंदपुराणेचैत्रकृष्णाचतुर्थीव्रतकथासंपूर्णा ॥ १ ॥ ॥
॥ ॥ पार्वत्युवाच ॥ ॥ वैशाखमासेयाकृष्णाचतुर्थीसंकटाभवेत् ॥ कथंपू
ज्योगणाध्यक्षः किंनामकिंचभोजनम् ॥ १ ॥ ॥ गणेशउवाच ॥ ॥ वैशाख
स्यासितपक्षेचतुर्थ्यांतद्दिनेव्रतम् ॥ पूजनीयो वक्रतुंडोभोजनंशतपत्रकम् ॥ २ ॥ इयं
चतुर्थीशुभदायथायेनकृतानृप ॥ इतिहासंप्रवक्ष्यामिश्रद्धयाशृणुपार्वति ॥ ३ ॥
आसीत्पुरामहीपालोरंतिदेवःप्रतापवान् ॥ शत्रुतृणसमूहाग्निर्लोकपालेषुमित्र
ता ॥ ४ ॥ तस्यराज्येबभूवाथधर्मकेतुर्द्विजाग्रणीः ॥ तस्यभार्याद्वयंचासीत्सुशीला

For Private and Personal Use Only

चंचलापिच ॥ ५ ॥ सुशीलानिरतानित्यंव्रतकर्शितविग्रहा ॥ चंचलाबुभुजेनित्यं
व्रतधर्मपराङ्मुखी ॥ ६ ॥ सुशीलासुषुवेकन्यांसुभगांसुखदायिनीम् ॥ चंचला
याःसुतोजातोजहासोच्चैःपुनःपुनः ॥ ७ ॥ सुशीलाव्रतपुण्यात्तेकन्याजाताकृशां
गके ॥ अस्माकंव्रतहीनानांफलमीदृक्ततोभवेत् ॥ ८ ॥ इतितस्यावचःश्रुत्वासुशी
लाखिन्नमानसा ॥ प्रार्थयंतीगणाध्यक्षंयथोक्तविधिनासती ॥ ९ ॥ संकष्टनाशनं
चक्रेव्रतमेतत्समाहिता ॥ ततोरात्रौददर्शाथगणेशंव्रतदायकम् ॥ १० ॥ ॥
श्रीगणेशउवाच ॥ ॥ सुशीलेतवकन्यायामुखान्मौक्तिकविद्रुमाः ॥ पतिष्यं
त्यनिशंभद्रेयथात्वांचप्रहास्यति ॥ ११ ॥ पुत्रस्तेभविताशीलेवेदशास्त्रार्थतत्ववित्
॥ इतितस्यैवरंदत्वातत्रैवांतरधीयत ॥ १२ ॥ तस्याःपुत्रोबभूवाथकन्यामौक्तिक



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्षिणी ॥ धर्मकेतुस्तथाकालेपंचत्वंसमुपागतः ॥ १३ ॥ चंचलाधनमादायगतागे
हांतररुषा ॥ सुशीलागृहमासाद्यकन्यापुत्रौररक्षच ॥ १४ ॥ कन्यामुखोद्भवैर्मुक्ता
फलैस्तस्याधनंबहु ॥ ववृधेसंपदोनित्यंचंचलावीक्ष्यतप्यत ॥ १५ ॥ ततःसाचंचला
दुष्टादृष्ट्वातप्यतनित्यशः ॥ सुशीलातनयांकूपेपातयामासदुष्टधीः ॥ १६ ॥ रक्षिता
सातदाकूपेहेरंबेनकृपालुना ॥ तथैवपुनरायातामातृगेहेमुदान्विता ॥ १७ ॥ तांवि
लोक्याथसादुष्टाचंचलाचित्तविभ्रमा ॥ देवोरक्षितवान्यस्यतस्यान्यःकिंकरिष्यति ॥
१८ ॥ सुशीलातनयांचैवदृष्ट्वाहर्षितमानसा ॥ तस्यामालिंगनंचक्रेश्रीगणेशेनरक्षिता
म् ॥ १९ ॥ अस्माकंचाप्यनाथानांनाथोश्रीगणनायकः ॥ सुशीलापादयोर्नत्वाचंचला-
विस्मितातदा ॥ २० ॥ क्षमध्वंमांचदुष्टांचपापाचरणतत्परम् ॥ त्वंदयालुःशुभेशीलेत्वं

For Private and Personal Use Only

ग.अ. २३ रिते ह्युभयोः कुले ॥२१॥ यस्य देवा हि रक्ष्यंति तस्य कुर्वंति मानवाः ॥ नश्यंति ये च ते कथा. वै.
सर्वे साधूनां दोषतत्पराः ॥२२॥ चक्रे सापि व्रतं पुण्यं संकटां कष्टनाशिनीम् ॥ श्रीगणेश
प्रसादेन उभौ प्रीतेपरस्परम् ॥२३॥ शत्रवो मित्रतां यांति यस्य तुष्टो गणाधिपः ॥ संकष्ट
नाशनं चैव व्रतं चक्रे समाहिता ॥ २४॥ इति ते कथितं देवि यथा वृत्तमभूत्पुरा ॥ नातः
परतरं लोके व्रतं विघ्नविनाशनम् ॥२५॥ ॥ श्रीकृष्ण उवाच ॥ ॥ तथा त्वमपि
राजेंद्र व्रतं कुरु यथाविधि ॥ अरयो नाशमायांति सिद्धयः समुपस्थिताः ॥२६॥ बंधुभिः
सह धर्मज्ञ सदारः सह मातृभिः ॥ अचिरेणैव कालेन स्वं राज्यं प्राप्स्यते भवान् ॥ २७॥
॥ ॥ इति श्रीस्कंदपुराणे वैशाख कृष्ण चतुर्थी व्रत कथा संपूर्णा ॥१०॥ ॥ पार्वत्युवाच ॥ ॥ २३
ज्येष्ठमासे कथं पूज्यो गणेशो वत्स तद्वद ॥ किं नाम भोजने किं च तद्विधानं समासतः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षष्ठभावसंस्थौचेत्तदा तद्भावः नुः ... प्रालेयांशौ चंद्रे खलखग
सहिते पापग्रहयुक्ते शत्रुभावस्थे ... क्रूरैर्निष्पीडिते शनिप्रभृतिभिः क्रूरग्र
हैः योगेन दृष्ट्या वा पीडिते तनुसद ... न् शीतकरे चंद्रे तद्वान् रोगी स्यात् रुफभग्र

प्रालेयांशौ रिपुस्थे खलखगसहिते मानवो रोगवान्स्यात्क्रूरैर्निष्पीडितश्चेत्तनुसद
नगतः शीतरश्मिस्तदानीं क्रूरे केंद्रालयस्थे यदि शुभविहगैर्नेक्षिते रोगवान्स्या
त्तस्मिन्काव्यालयस्थे कुज गुरु कविभिर्नेक्षिते तद्वदेव २१
हद्दृष्टिरहितः केंद्रगः
क्रूरश्चेद्रोगवान्स्यात् तस्मिन्क्रूरे शुक्रराशिसंस्थे कुज शुक्र गुरुभिर्न दृष्टे तद्वदेव रोगवा
नेव स्यात् अत्र यद्यपि विशेषेनोक्तस्तथापि योगकर्तृग्रहस्वामि कफवातपित्तादि कोपजन्यो

For Private and Personal Use Only

जा॰लं॰ विशेषरोगोज्ञेयः २१ षष्ठेशे पुंराशिलग्नेस्वोच्चेवापापग्रहे दृष्टेसति नराणां जातानां अंगेशरी टी॰
२१ रे अरिजनवशातः शत्रुजनकारितः गूढरूपः प्रच्छन्नः गदोरोगः स्यात् अत्रग्रहतुंगराशी
नांप्रायः स्त्रीराशित्वात् पुंलग्नेवाशब्दप्रयोगेभिन्नएवयोगोज्ञायते षष्ठेशेराहुयुक्तः य-

पुंलग्नेस्वीयतुंगेरिपुभवनपतौवीक्षितेसन्नभोगेरंगेनूनंनराणामरिजनवशतः
स्याद्गदोगूढरूपः रिःफस्थानेस्थितेचेदरिसदनपतौसिंहिकापुत्रयुक्तेकिं
वासप्ताश्वयुक्तेपरगृहवसति[illegible]च्चवृत्तिर्नरःस्यात् २२

द्वासूर्ययुक्ताः द्वादशे
वास्थितः तदाजातः नरः परगृहवा [illegible] न २२ अथसप्तमभावफलंनिरूपयि २१
ष्यन्विवाहयोगमाह यावंतोग्रहाः [illegible] तावंतोविवाहाः नुः पुरुषस्यज्ञेयाः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रमतिमताजन्मलग्नाभिज्ञेनदैवज्ञे॰ ॥जनकभ्रात्रादौज्ञेयंहोरागमज्ञै
र्जातकशास्त्रविद्भिरधिकबलवतांग्रहाण ॰ कार्यः तत्राधिकबलंरविविधुकुभुवां
रविसूर्यचंद्रभौमानांअंगदिक् शैलसं॰ ...यषट्रूपाणि चंद्रस्यदशरूपाणिभौम-

यावंतोवाविहंगामदनसदनगाश्चेनिजाधीशदृष्टास्तावंतोनुर्विवाहास्त्वथक्रमति
मताज्ञेयमित्थंकुटुंबे कार्याहोरागमज्ञैरधिकबलवतांखेचराणांहियोगादादे
श्यंतत्रवीर्यंरविविधुकुभुवामंगदिक्शैलसंख्यं २३

स्यसप्तरूपाणि अन्येषां
षट्रूपाण्येव अंगरूपाधिकोबलीतिपद्धतिवचनात् २३ गृहिणीकारकाः सप्तमभावे-
शुभग्रहाः शुक्रेंदुजीवशशिजैः सकलैस्त्रिभिर्वाद्वाभ्यांकलत्रभवनेत्वतथैककेन एषांगृ

For Private and Personal Use Only

यां दुःखीपश्चात्सुखीस्यात् लाभगेष्टमेशेपापे अल्पायुःस्यात् तस्मिन्नेवशुभग्रहयुक्तेजातानां दीर्घमायुःस्यात् २६ आयुर्गृहेशः अष्टमपतिः क्रूरयुक्तः षष्ठद्वादशगतः तदाऽल्पमायुःकु-र्यात् अष्टमपतिः लग्नेशयुक्तः अरिप्रांत्यसंस्थः इत्यनुषंगः तदास्वल्पमायुः प्रदत्ते अष्टमेशः तत्सु

रंध्रस्थानस्थितावास्थिरभवनगताः शुक्रवागीशसौम्याः कृच्छ्राणांकर्मणांनाभ वतिहिनियतंकारकस्तब्धभावः बाल्येदुःखीनरःस्यान्निधनगृहपतौलाभयाते सुखीस्यात्पश्चात्पापेल्पमायुः शुभखगसहितेदीर्घमायुर्नराणाम् २६

रविभुवोवा

तत्राष्टमेतद्वत्चिरायुः प्रदत्ते लग्नेशोऽ स्थितः द्वितीयेस्थितश्चेत्तदातस्करोवीर्यु क्तश्चस्यात् २७ प्रसूतौजन्मसमरे लग्नपतौहीनवीर्येअष्टमषष्ठग

तौनदासंग्रामेकीर्तिशेषंप्राप्नोतिसं यपंचलंप्राप्नोतीत्यर्थः तावेवायु
र्देहाधिनाथौसबलौचेद्विजयीभवति ग्युतश्चेत् आंदोलिकायाः शिबिकाया
जयः शिबिकारूढोजयतीत्यर्थः चतुर्थ .. लग्नेशनचंद्रेणचयुतः मूर्तौलग्नेस्थितश्चेत्तदादंता

कुर्यादायुर्गृहेशः खलयुगरिप्रांत्यसंस्थोल्पमायुश्चेल्लग्नाधीशयुक्तोनिधनभव
नपः स्वल्पमायुःप्रदत्ते रंध्रस्थोवाचिरायुस्तदनुरविभुवस्तत्रतद्वल्लयेशो ... शा-
स्थानस्थितश्चेज्जनुषिहिमनुजोवैरियुक्तस्करःस्यात् २७ बलेंद्रैः महागजैः जयःस्यात

अथचतुर्थेशोगुरुयुतः लग्नेचेत्तदावाजिवाहैः वाजिराजैः गजेंद्रैश्चसहजयःस्यात् इत्यष्टमभा
वः २८ अथनवमभावः शुभयोगमाह नवमभावेशोगुरुदृष्टः लग्नस्थश्चेत्तत्रजातोराजवंद्यः

राजमान्यः स्यात् भाग्येशः नवमाधिपः लग्नस्थः चतुर्थनवमपतीस्वभवनंचतुर्थपतिः चतु
र्थनवमपतिर्नवमंपूर्णदृष्ट्यापश्यतश्चेत्तदासर्वासांधनधान्यसुवर्णादिसंपदांआस्पदंआश्रयःमनु
जःस्यात् वाहनेशः अष्टमस्थस्तदामनुजः भाग्यराहित्यंव्रजति होराविद्भिरेवंप्रकारेणभाग्यराहि

आयुर्देहाधिनाथौनिधनरिपुगतौहीनवीर्यौप्रसूतौसंयामेकीर्तिशेषंव्रजतिबलयु
तौतौतदात्तज्जयाप्तिं शक्रेणांदोलिकायास्तनुपविधियुतौवाहनस्याननाथौमू
र्तौदंतावलेंद्रैरथगुरुसहितःस्याज्जयोगंधवाहैः २८ त्यंनुः हीनानांशुभलक्षणवचो

बलादिरहितानांप्राप्तिस्तदनुचपलताग्
जमान्यः दीर्घायुधर्मशीलश्चस्यात्

मेणसंबंधः २९ अथनवमेशोलाभगेरा
र्वाहनेशाः द्वितीयलग्नचतुर्थपतयः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥१॥ ॥श्रीगणेशउवाच॥ ॥ मातर्ज्येष्ठेऽसितेपक्षेगणेशस्यचतुर्थिका ॥सौभाग्यदायिनीदेवीपतिदासाप्रकीर्तिता ॥ २॥ तस्यामारभ्युरथः पूज्योविधिनाभक्तिचेतसा॥ भोजनंचघृतंदिव्यंब्राह्मणान्भोजयेत्तदा॥ ३॥ इतिहासंप्रवक्ष्यामिप्राग्भूतंशृणुपार्वति॥ पुराणजंमहादेविगणेशस्यव्रतेविधिम्॥४॥ आसीत्पुराकृतयुगेपृथुभूपःशतक्रतुः॥ तस्यराज्येद्विजश्रेष्ठोदयादेवइतिस्मृतः॥५॥चत्वारस्तनयास्तस्यबभूवुर्वेदपारगाः॥ पित्राविवाहितास्तेतुगृह्योक्तविधिनाततः॥ ६॥ तासुसर्वासुज्येष्ठातुस्नुषाश्वश्रूमुवाचह॥ आजन्मतःकृतंश्वश्रुव्रतंसंकष्टनाशनम्॥७॥ शुभंमयापितुर्गेहेतथाज्ञांदेहिमांप्रभो॥ तदापुत्रवधूवाक्यंनिशम्यश्वशुरोब्रवीत्॥८॥ ॥श्वशुरउवाच॥ ॥शृणुष्ववरपत्नीनांज्येष्ठा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रेष्ठा गुणाधिका ॥ नकष्टंनदरिद्रासिकिमर्थंक्रियतेव्रतम् ॥ ९॥ भोगान्भुंक्ष्व
महाभागेकिमर्थंकोगणेश्वरः ॥ततः कालेनसंजातागर्भिणीसावधूर्नृप ॥१०॥
श्वश्रावतनयंश्रेष्ठंश्वश्रूस्तांचपुनः पुनः ॥ निषिद्धामासनोभद्रेव्रतंकुरुममाज्ञ
या ॥११॥ एवंबहुविधेकाले तत्र क्रुद्धोगणाधिपः ॥ तस्याः पुत्रविवाहेतुवर व
ध्वोः सुमंगले ॥ १२॥ जहारतनयंतस्या हाहाकारोतदाप्यभूत् ॥ क्वगतः केनवा
नीतः कुतोगत्वाजनाकुलाः ॥१३॥ एवंजनानांगदितंतस्यमातातिविह्वला ॥
दयादेवंस्वश्वशुरंरुदंतीवाक्यमब्रवीत् ॥ १४॥ त्वयानिषेधितंदेवगणेशस्यव्र
तंप्रभो ॥ तेनकर्मविपाकेन क्वगतोममपुत्रकः ॥ १५॥ दयादेवोपितच्छ्रुत्वापो २४
त्रदुःखेनदुःखितः॥ तस्यपुत्रवधूः साचसाकन्यानष्टभर्तृका ॥१६॥ पतिदुःखा

For Private and Personal Use Only

र्दितानित्यंपूजयंतीगणेश्वरम् ॥ संकष्टनाशनंसाचव्रतंचक्रेनुमासिकम् ॥१७॥
एकदादुर्बलःकश्चित्तस्यगेहेसमागतः ॥ भिक्षार्थीविदतत्वज्ञोकन्यांमृदुलभा
षिणीम् ॥१८॥ भिक्षांप्रदेहिमांकन्येभोजनंक्षुन्निवारकम् ॥ साकन्याधर्मसं
पन्नातस्यविप्रस्यपूजनम् ॥१९॥ चकारविधिनाभक्त्याभोजनाच्छादनादि
कम् ॥ सोपितुष्टेनमनसावचनंतामुवाचह ॥२०॥ वरंब्रूहियथाभद्रेयत्तेमनसि
वर्तते ॥ विप्ररूपीगणपतिस्तवप्रीत्यात्विहागतः ॥२१॥ इतिश्रुत्वातदाकन्या
कृतांजलिरभाषत ॥ यदितुष्टोसिविघ्नेशभर्तारंममदर्शय ॥२२॥ तस्यास्तद्वच
नंश्रुत्वागणेशः प्राहसत्वरम् ॥ तथास्तुतेपतिःशीघ्रमागमिष्यतिशोभने ॥२३॥
इतितस्यैवरंदत्वादेवोत्यंतरधीयत ॥ सोमशर्माद्विजःकश्चित्तदास्मिन्पुरेवन-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



म् ॥२४॥तीर्थयात्राप्रसंगेनभ्रमन्तंचददर्शसः ॥विप्रपुत्रंचतंज्ञात्वासोपिचानीय
तत्पुरे॥२५॥दयादेवोददर्शाथस्वपौत्रंचानयिष्यतः॥जनानागरिकाःसर्वेतस्यमा
ताप्रहर्षिता॥२६॥श्रीगणेशप्रसादेनपुत्रःप्राप्तोमयाधुना॥वस्त्रालंकारकंकृत्वाअंके
सालिंगितासती॥२७॥सोमशर्मदयादेवोनमश्चक्रेपुनःपुनः॥त्वत्प्रसादाच्चविप्रेंद्रपौ
त्रोमेह्यागतोगृहम्॥२८॥वस्त्रंचभोजनंगांचब्राह्मणेभ्यस्तदाऽर्पयत्॥पुनर्मंडपि
कांकृत्वायथोक्तविधिनाततः॥२९॥विवाहमंगलंकृत्वाहर्षिताःसकलाजनाः॥भा
ग्यवतीचसाकन्यास्वभर्त्रासहमोदिता ॥३०॥कृष्णपक्षेतुज्येष्ठस्यचतुर्थीकामदा
नृणाम् ॥तस्यांपूज्योनरैःस्त्रीभिरेकदंतोगजाननः॥३१॥पूर्वोक्तेनविधानेनभक्त्या-
प्रीत्याचश्रद्धया॥व्रतेनानेनभोदेविलब्धकामाभविष्यसि॥३२॥ ॥श्रीकृष्णउवाच॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ईदृशंहिव्रतंराजन्‌गणेशस्यमहात्मनः॥ तस्मात्त्वयापिराजेंद्र कर्तव्यंरिपुनाशनम्‌॥
॥३३॥ ॥ इतिश्रीस्कंदपुराणे ज्येष्ठकृष्णचतुर्थीव्रतकथासंपूर्णा॥ ११॥ ॥ पार्वत्युवाच॥ ॥
पुत्रआषाढकृष्णस्यचतुर्थीकथिताशुभा॥ तस्यांकेनप्रकारेणपूजनीयोगणाधिपः
॥१॥ ॥श्रीकृष्णउवाच॥ ॥शृणुराजन्प्रवक्ष्यामिकथांविघ्नविनाशिनीम्‌
॥पौराणिकींसेतिहासांगणेशप्रीतिकारिणीम्‌॥ २॥ पार्थआषाढमासेतुलंबोदरइति
स्मृतः॥ पूजनीयोगणाध्यक्षः पूर्वोक्तविधिनाततः॥ ३॥ पुरातुद्वापरेराजन्मुरिमाहिष्मतो
नृप॥ अभून्महीजितोनामराजापुण्यप्रतापवान्‌॥ ४॥ प्रजांपालयतोनित्यंपुत्रहीनोभ
वत्तदा॥ पुत्रहीनस्यतद्राज्यंतस्यैवनसुखंगृहे॥ ५॥ पुत्रहीननृणांजन्मवृथावेदेतिवि
श्रुतं॥ तेनैवदत्तमश्नंतिपितरःकोष्णवोदकम्‌॥ ६॥ कालंव्यतीयराजासोचाहर्निशि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनोरथैः ।। बहुपुण्यंकृतंतेनपुत्रस्योत्पादनेतदा ।। ७ ।।नाभवत्तस्यपुत्रस्तुसंसारा
र्णवतारकः।यौवनंनिर्गतंतस्यवृद्धभावंसमाविशत् ।।८।। ब्राह्मणान्ससमाहूयवे
दविद्याविशारदान् ।। बुद्धिमतीःप्रजाश्चान्याराजातेभ्यउवाचह ।। ९ ।। ।।राजोवा
च ।। ।। किंभविष्यतिभोविप्राःपुत्रहीनस्यभोजनाः ।। इहजन्मनिकिंचिद्वैनम
यापातकंकृतम् ।। १० ।। अन्यायोपार्जितंवित्तंकोशेक्षिसंमयानहि ।।सुतवत्पालि
तालोकाधर्मेणपालितामही ।। ११ ।। दुष्टेदंडोमयादत्ताइष्टमित्रेषुभोजनम् ।। शि-
ष्टाःसंपूजितालोकागोब्राह्मणहितेरतः ।। १२ ।। इत्येवंपालितापृथ्वीधर्मेणैवा-
खिलाजनाः ।। कस्मात्पुत्रोगृहेमेऽधनभवेद्भोद्विजोत्तमाः ।।१३।। ।।विप्रा-
ऊचुः ।। ।। वयमुपायंकुर्वतस्तवपुत्रस्यकारणम् ।। इतिचिंतयमानाश्चकुर्व



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तोराजसत्तम ॥ १४ ॥ तदातस्यप्रजाःसर्वामतिंकृत्वामनोरथम् ॥ बुद्धिमंतोजना
श्चान्येसहविप्रैर्वनंययुः ॥ १५ ॥ वनेतावद्भ्रमंतश्च इतश्चेतश्चसत्वराः ॥ इत्येवंभ्र
ममाणास्तेददृशुर्मुनिसत्तमम् ॥ १६ ॥ तप्यमानंतपोध्यानंनिराहारंनिरूदकम् ॥
ब्रह्मतुल्यंजितात्मानंजितक्रोधंसनातनम् ॥ १७ ॥ लोमशंनामविमलंसर्वशास्त्रविशा
रदम् ॥ दीर्घायुषमनंतंच अनेकब्रह्मसंकुलम् ॥ १८ ॥ एकेनैवापिकल्पेनलोमतस्य
विशीर्यते ॥ इत्येवंलोमशंनामत्रिकालज्ञंमहामुनिम् ॥ १९ ॥ एवंविधंमुनिंदृष्ट्वा
जग्मुस्तेतत्समीपतः ॥ यथान्यायंयथार्हंचप्रणिपत्यत्वुपस्थिताः ॥ २० ॥ हर्षितास्त्व
भवन्सर्वेऊचुस्तेन्चपरस्परम् ॥ अस्मद्भाग्यवशादेवप्राप्तोयंमुनिसत्तमः ॥ २१ ॥
उपदेशोयथान्यायंतथास्माकंभविष्यति ॥ इतिसंचिंत्यतेसर्वेतंमुनिंवाक्यमब्रुव-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न्॥२२॥ ॥प्रजाऊचुः॥ ॥श्रूयतांमुनिशार्दूलअस्माकंदुःखकारणम्
॥तत्संशयच्छेदनायतवसान्निध्यमागताः॥२३॥आचक्ष्वभोयथास्वामिन्नपरं
किंचकथ्यते॥ब्राह्मणोमुनिवर्यस्त्वंत्वत्समोनैवदृश्यते॥२४॥ ॥लोमश
उवाच॥ ॥किमर्थमागतास्त्वत्रकिंकार्यंब्रूतभोजनाः॥मांकिमर्थंब्रुवंतस्तत्त्वा
गताःकथ्यतांजनाः॥२५॥निःशंकंचकरिष्यामिभवतांचहितेरतः॥परोपकरणा
र्थायअस्माकंकेवलंतपः॥२६॥ ॥जनाऊचुः॥ ॥आगताःस्मद्विजश्रेष्ठ
कारणंविद्यतेमहत्॥राजामहीजितोनामब्राह्मणोधर्मतत्परः॥२७॥दाताशूरःसु
भाषीचपुत्रहीनोपिवर्तते॥वयंतुपालितास्तेनपुण्यकर्मन्महात्मना॥२८॥अस्मा
कंपितरःस्वामिन्केवलंजन्महेतवः॥तस्यैवकारणादत्रचागतागहनेवने॥२९॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथोपायंवदस्वामिन्राज्ञेपुत्रोभविष्यति ॥ तस्मिन्राज्ञिगुणैर्युक्तेपुत्रप्राप्तिनर्जाय
ते॥ ३०॥ मतिंकृत्वावयंसर्वेह्यागतागहनेवने॥ तस्यभाग्यवशाद्देवभवतांदर्शनंल
भेत्॥ ३१॥ पुण्यंदानंव्रतंयत्तुमुनेतत्कथयस्वयम्॥ केनकर्मविपाकेनपुत्रस्त-
स्यभविष्यति॥ ३२॥ इतितेषांवचःश्रुत्वाध्यानस्तिमितलोचनः॥ तस्योपकर
णार्थायमुनिर्वाक्यमुवाचह॥ ३३॥ ॥लोमशउवाच॥ ॥शृणुतावहिताविं
प्राव्रतंसंकष्टनाशनम्॥ पुत्रप्रदमपुत्राणांनिर्धनानांधनप्रदम्॥ ३४॥ आषाढे
कृष्णपक्षेचचतुर्थीयाप्रकीर्तिता॥ तस्यांपूज्यश्चवते राजन्नेकदंतोगजाननः॥
३५॥ पूर्वोक्तेनविधानेनश्रद्धयापरयायुतः॥ व्रतंकुर्याद्ब्राह्मणानांभोजनाच्छा
दनादिकम्॥ ३६॥ पुत्रास्तस्यभविष्यंतिश्रीगणेशप्रसादतः॥ इतिश्रुत्वामुने

For Private and Personal Use Only

र्वाक्यंसर्वेप्रांजलयःस्थिताः॥३७॥नेमुश्चदंडवद्भूमौसर्वेस्वपुरमाययुः॥यथावृत्तं
वनेजातंसर्वेराज्ञेन्यवेदयन्॥३८॥तेषांराजावचःश्रुत्वाहर्षितोमानदःसुधीः॥व्रतं
चक्रेविधानेनविप्रपूजापरायणः॥३९॥तस्याराज्ञ्याःसुदक्षिण्यागर्भाधानमभूत्त-
दा॥पुत्रःसुलक्षणोजातःश्रीगणेशप्रसादतः॥४०॥प्रजाःसंतोषिताःसर्वानगरे
सर्वमंगलम्॥महीजितोब्राह्मणेभ्योधनंरत्नादिचांददत्॥४१॥ ईदृशोहिप्रभा
वोयंव्रतस्यपार्थिवोत्तम॥करोतियोनरोभक्त्यासससर्वसुखमाप्नुयात्॥४२॥
॥ ॥श्रीकृष्णउवाच॥ ॥तस्मात्त्वमपिराजेंद्रव्रतंकुरुयथाविधि॥सर्वा-
न्कामानवाप्नोषिश्रीगणेशप्रसादतः॥४३॥ सर्वराज्यमवाप्नोनिरिपवःसंक्षयंत
था॥युधिष्ठिरनृपश्रेष्ठयेकुर्वंतिव्रतोत्तमम्॥४४॥एकांतमानसायेवैऋषयःपं-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

डितोत्तमाः ॥ तेषांपुत्राश्चपौत्राश्चनिर्विघ्नासंततिर्भवेत् ॥ ४५ ॥ पठनाच्छ्रव-
णाद्वापिकार्यसिद्धिःप्रजायते ॥४६॥ ॥इतिश्रीस्कंदपुराणेआषाढकृष्णाचतुर्थीव्रतकथासंपूर्णा॥७२
॥ ॥अथाधिमासकृष्णाचतुर्थीव्रतकथा ॥ ॥स्कंदउवाच ॥ ॥ शृण्वंतुऋषयः
सर्वेकथांपौराणिकींशुभाम् ॥ गणाधिपव्रतस्यायंप्रभावोवर्णितोयथा ॥ १ ॥ अरण्ये
वर्तमानास्तेपांडुपुत्राद्विजोत्तमाः ॥ सर्वेधर्मसुशीलाश्चसर्वेकृष्णपरायणाः ॥२॥ ए
कदातुगृहेतेषांश्रीव्यासोमुनिपुंगवः ॥आगतःस्वेच्छयाचारीतंदृष्ट्वामुनिसत्तमम् ॥
३॥ सहसोत्थायतेसर्वेकृतप्रांजलयःस्थिताः ॥ धन्यावयंगृहंधन्यंभवतोदर्शनेनच ॥
४॥ अद्यमेसफलंजन्मभवदागमकारणात् ॥ अद्यमेसफलंसर्वंदर्शनात्क्लेशनाशन
म् ॥ ५ ॥ महतांकृपयागेहेस्वागतंवनवासिनाम् ॥ आत्मानंसाधुमन्येऽहंराज्यभ्र

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्टंपराङ्मुखम्॥ ६॥ इतिश्रीमादयःसर्वेनमस्कृत्याग्रतःस्थिताः॥ पाद्यार्घ्यमास
नंदत्वाद्रौपदीप्रणतांजलिः॥७॥ राज्यभोगान्यथायोग्याकर्शितावनवासिनी॥ किं
कर्तव्यंमयाचाद्यउपायंकष्टनाशनम्॥८॥येनपराजिताःसर्वेरिपवोयांतिसत्वरम्॥इ
त्युक्तवंतंराजानंदुष्टसंकष्टनाशन्॥ ९॥ उवाचकृपयाव्यासोसर्वज्ञंपार्थिवंतदा॥ ना-
स्तिभूमंडलेराजात्वत्समोधर्मतत्परः॥ १०॥ कथयामिव्रतंतेनदुःखसंकष्टनाशनम्॥
शुभदंफलदंदिव्यंभुविसर्वार्थसाधनम्॥११॥ विद्यार्थीलभतेविद्यांधनार्थीलभतेधन
म्॥ इतिहासंप्रवक्ष्यामिशृणुपार्थपुरातनम्॥१२॥ आसीत्पुराकृतयुगेचंद्रसेनोम-
हीपतिः॥ सभार्योदीक्षितोधीमान्सुहृद्भिःपरिवारितः॥ १३॥ स्वजनैर्बंधुभिश्चैव
तत्पुत्रैःसहसंयुतः॥तस्यप्रियाचसौभाग्यासतीगुणवतीचसा॥१४॥नाम्नारत्नाक-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लीराजन्पतिव्रतपरायणा ॥तयोःपरस्परंप्रीतिरभवन्मुनिसंमता ॥१५॥
कदाचिद्दैवयोगेन हृतंराज्यंचशत्रुभिः ॥ कोशोबलंचापहृतंविभ्रष्टोबंधुभिःस
ह॥१६॥रत्नावल्यातयासार्धंनिर्गतोभूमिवल्लभः॥ क्षुधयापीडितोराजाचैकवा
सास्तृषादिभिः॥१७॥ इतश्चेतश्चविचरस्तयासार्धंमहीपतिः॥ एकाकीवनमा
साद्यतयासार्धंयुधिष्ठिर॥१८॥सूर्यास्तंचततोजातमरण्येक्षुत्तृषार्दितः॥व्याघ्रै
श्चचक्रवाकैश्चबककोकिलसारसैः॥१९॥ कंटकैः क्लेशितराज्ञीवनंदृष्ट्वाभयंकरं
॥तांविलोक्यनृपश्रेष्ठोदुःखेनक्लेशतांगतः॥२०॥ततःप्रभातसमये मार्कंडेयंम
हामुनिम्॥ दूरात्संददृशेराजातत्रैवविचरन्वने॥२१॥ उपगम्यशनैस्तत्र दंडवत्
पतितोभुवि॥तयाचभार्ययासार्धंप्रणिपत्यपुनःपुनः॥२२॥ कृतांजलिपुटोभू

For Private and Personal Use Only

गङ्ग. त्वाराजावचनमब्रवीत्॥ तपस्विनंमुनिंदांतंमार्कंडेयंवनेस्थितम्॥ २३॥ ॥ कथा.

३० राजोवाच॥ ॥ दुष्कृतंकिंमयापूज्यपूर्वजन्मनियत्कृतम्॥ तेनकर्मविपाकेनरा अ.

ज्यलक्ष्मीःपरैर्हृता॥ २४॥ ॥ मार्कंडेयउवाच॥ ॥ शृणुराजन्प्रवक्ष्या

मियत्कृतंपूर्वजन्मनि ॥ मृगयालुब्धकोभूत्वागतस्त्वंगहनंवनम् ॥ २५॥ मृगशार्दू

लशशकान्हन्यमानोवनेतदा॥ तस्यांरात्रौभ्रमन्राजंश्चतुर्थीमधिमासिकाम्॥

२६॥ तस्मिन्वनेमहारम्यंसरस्तत्रैवदृष्टवान्॥ तत्तीरेनागकन्यानांसमूहंरक्तवास

साम्॥ २७॥ गणेशंपूजयंतीनांदृष्ट्वातत्रैवविस्मितः॥ उपगम्यशनैस्तत्रापृ स्ता

श्चयथाविधि॥ २८॥ स्वर्गदिव्योयथापूज्योवक्तव्यःश्रीगणाधिपः॥ अहंपूजांक ३०

रिष्यामिप्रभावंब्रूतशोभनाः॥ २९॥ ॥ नागकन्याऊचुः॥ ॥ संपूजय

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गणेशंत्वंसर्वसिद्धिप्रदायकम् ॥ शांतिदंपुष्टिदंनित्यंसंततिंसुखसंपदः ॥ ३० ॥
॥ ॥राजोवाच॥ ॥ कस्मिन्मासेदिनेकस्मिन्पूजनीयोगणाधिपः॥ किं
वादानंकथंपूज्योयूयंवदतमेपुनः॥ ३१॥ ॥नागकन्याऊचुः॥ ॥ अ
धिमास्यसितेपक्षेचतुर्थ्यांचाविधूदये॥ पूजनीयोविधानेनविभ्रमहानृपसत्तम ॥
३२॥ यथाचोत्पद्यतेशक्तिर्भक्तिभावेनचार्चयेत् ॥ पंचामृतेनचस्नाप्यादृक्तपुष्पैः
प्रपूजयेत् ॥३३॥ गंधधूपैश्चनैवेद्यदूर्वायुग्मैःसुवासितैः॥ मोदकान्पंचदशका
न्घृतशर्करयायुतान् ॥ ३४॥ कृत्वापंचगणेशायपंचविप्रायदापयेत्॥ कुमार्यैर्वि
टकान्दत्वास्वयंपश्चात्तुभोजयेत्॥ ३५॥सर्वोपस्करणैर्युक्तंगणेशःप्रीयतामि
ति॥ ततःपौराणिकंश्रुत्वाइतिहासकथामिमाम्॥ ३६॥सर्वकामानलभेत्सिद्धि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

मेवंपूज्योगणाधिपः ॥ श्रुत्वातासांवचोराजानमस्कृत्यपुनःपुनः ॥ ३७॥ गृ
हीतंतत्रराज्ञाचव्रतंसंकष्टनाशनम् ॥ निर्जगामसरस्तीराज्ज्ञात्वादेवंगणा
धिपम्॥ ३८॥ तत्प्रभावेणसंतुष्टोगणेशःसिद्धिदायकः ॥ अभवद्धनधान्यादि
पुत्रदारादिकंबहु ॥ ३९॥ रत्नहारैःसुवर्णैश्चगोगजैःपूरितंगृहम् ॥ कस्मिं
श्चित्समयेत्वंचधनांधोविस्मृतोव्रतं ॥ ४०॥ ततःप्राप्तंहिपंचत्वंत्वयापूर्वेहि
जन्मनि॥ तत्प्रभावाद्राजकुलेनवंजन्माभवत्पुनः ॥४१॥ सुहृन्मित्रप्रियायु
क्तंसंप्राप्तंविमलंवपुः ॥ व्रतभंगप्रभावेणपुनस्त्वमीदृशोभवः॥ ४२॥ ॥
राजोवाच ॥ ॥ किंकर्तव्यंमयाब्रह्मन्नधुनादुःखनाशनम्॥ यथोपायेनसं
विघ्नाः क्लेशाःशांतिमुपागताः॥ ४३॥ ॥ मार्कंडेयउवाच॥ ॥यथा



For Private and Personal Use Only

पूर्वविधानेनसंपूज्यो ऽ त्रगणेश्वरः ॥ संकष्टनाशनंचैवव्रतंकुरुतथानृप॥
४४ ॥ राज्यंनृपत्वंसंप्राप्तः पुनःप्रीतेगजानने ॥ तस्मात्त्वंपूज्यगणपंस्वयंक्ले
शोपशांतये॥ ४५॥ ॥ व्यासउवाच ॥ ॥ मार्कंडेयवचःश्रुत्वा
प्रणिपत्यययौगृहम् ॥ सभार्ययाव्रतंचक्रेभक्तियुक्तोयथाविधि॥ ४६॥ रिप
वःसंक्षयंयातानष्टंराज्यंचलब्धवान्॥ सर्वकामोभवेत्सिद्धिर्गणेशस्यप्रसादतः
॥४७॥ ॥स्कंदउवाच॥ ॥ इतिव्यासवचःश्रुत्वापांडुपुत्रोयुधि-
ष्ठिरः॥ कृतांजलिर्बभाषेदंश्रीव्यासंनृपसत्तमः॥४८॥ ॥युधिष्ठिरउवाच
॥ ॥व्रतस्यास्यविधिंब्रूहिकृपयाकष्टनाशनम्॥ किंनामभोजनंकिंचक
थंपूज्योगणेश्वरः ॥ ४९॥ ॥व्यासउवाच॥ ॥राजन्कृष्णाच

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुर्थ्यांच पूजनीयोगणाधिपः ॥ पंचामृतैः कृतंस्नानं षोडशैरुपचारकैः॥५०
॥रक्तैः करवीरपुष्पैर्नैवेद्यैर्मोदकादिभिः ॥ रक्तपुष्पाक्षतैर्दूर्वैरेभिर्नामपदैः
पृथक् ॥५१॥ विश्वप्रियायेत्याचमनंस्नानंचब्रह्मचारिणे ॥ वस्त्रंगणेश्वराये
तिपुष्टिदायेतिचंदनं ॥ ५२॥ विनायकायपुष्पाणि धूपंचोमासुतायच ॥ दीपं
रुद्रप्रिया येतिनैवेद्यंविघ्ननाशिने ॥५३॥ तांबूलं फलदायेति फलंसंकष्टना-
शिने॥ ततःसंप्रार्थयेद्देवंविघ्नेशंचगणाधिपम् ॥५४॥ संसारपीडाव्यथि
तंभयार्तंक्लेशान्वितंमांसुमुखप्रसीद ॥ त्रायस्वमांदुःखदारिद्रनाशननमोनमो
विघ्नविनाशनाय ॥ ५५ ॥ पुष्पांजल्यामिमंमंत्रंचद्द्यायार्घ्यंप्रदापयेत् ॥ क्षी
रांभोधिसमुद्भूतद्विजराजकुलाधिप ॥५६॥ रोहिण्यासहितश्चंद्रगृहाण



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्घ्यंनमोस्तुते ॥ब्राह्मणेभोजनंदत्वामोदकान्दक्षिणान्वितान् ॥५७॥ पश्चात्स्वयंतुभुंजी
तदेवब्राह्मणशेषतः ॥ भूमिशायीजितक्रोधोलोभदंभाविवर्जितः ॥५८ ॥प्रतिमासंयुतः
कुर्याद्व्रतंहेरंबतुष्टये ॥ विद्यार्थीलभतेविद्यांधनार्थीलभतेधनम् ॥५९ ॥कुमारीशुभ
भर्त्तारंपतिनासहमोदते ॥ विधवानुयदाकुर्यात्सौभाग्यंपरजन्मनि ॥ ६०॥ पुत्रार्थीलभ-
ते पुत्रान्रोगीरोगाद्विमुच्यते॥ भीतोभयाद्विमुच्येतबद्धोमुच्येतबंधनात्॥६१॥व्यासउवाच॥
एवंत्वमपिराजेंद्रव्रतंसंकष्टनाशनम् ॥ कृत्वाप्राप्नोषिस्वराज्यंगणेशस्यप्रसादतः ॥ -
॥६२॥ पठंतिचैवयेभक्त्याकथांपौराणिकींशुभाम् ॥प्राप्नुवंतिपरांसिद्धिंसुखंसंप
त्तिमुच्चकैः ॥६३॥इत्येतत्कथितंसर्वंयथापृष्टंनृपोत्तम॥ संकष्टनाशनंनामव्रतंस-
र्वार्थसाधकम्॥६४॥ ॥इतिश्रीस्कंदपुराणेव्याससयुधिष्ठिरसंवादे अ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धिकमासकृष्णागणेशचतुर्थीव्रतकथा संपूर्णा ॥ ॥ श्रीसंकष्टनाशनगजाननार्पणमस्तु ॥ ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ ॥ शुभं भवतु ॥



इदं पुस्तकं मोहमय्याख्य राजधान्यां श्रीकृष्णदासात्मज गंगाविष्णुना श्रीवेंकटेश्वर शिलायंत्रे अंकितम् - संवत् १९४० शालिवाहनशकाब्दाः १८०५

इस यंत्रालयमें मुंबईके छापेके सब ग्रंथ ( श्रीमद्भागवत भागवत रामायणादि बडे और छोटे ग्रंथ) यथार्थ दामसे मिलेंगे. जिन् महाशयोंको पत्र भेजना होय उन्होने शास्त्री अक्षरमें स्पष्ट लिखके ठिकाणा-पत्ता- नाम-गाम-जिल्हा सहित लिखके भेजना. दाम चाहिये तो पहेले अथवा पुस्तक पोहंचे पर डांकखानेमे देना

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्रतराजका पुस्तक अच्छा जाडा कागदका, सुशोभित सांचा का, टाइपके उपर छपनेका काम चला है. और 'पूजापंकज भास्कर' यह अति उत्तम ग्रंथ सब लोगोंके हितार्थ - श्री महाराजा परम उदार श्री मैथिलाधिपति ( दरभंगाके ) इन्होने शास्त्री द्वारा अनेक ग्रंथोंका प्रमाणसें बणवायके तयार किया है सो भी छपके तयार होताहै. एक महिनेसे बाहेर पडेगा. और यह श्री वेंकटेश्वरछापखानेमें जाडे कागद, बडा अक्षर और अच्छी शाईसें ग्रंथ छपजातेहैं. टाईप और शिलाक्षर दोनो हैं.

पत्ता इस मुजब लिखना- श्री मुंबईमें, मुंबादेवी बजारमें, मेहेरवानकी चालीमें श्री वेंकटेश्वरछापखानेमें श्री गंगाविष्णु श्रीकृष्णदास बजाजके पास पहुंचे.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतिश्रीगणेशसंकष्टचतुर्थीव्रतकथास०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जै०आ०लि०
डा० ९१४

[illegible]

3398

For Private and Personal Use Only